Barcode : 2040100028199
Title - Bashya's Work (Madhyamavyayoga, Dutakavya, DutaGhatotkacha, Karnabhara and Urubhanga
Author - Ganapathi Sastry. T
Language - sanskrit
Pages - 176
Publication Year - 1912
Barcode EAN.UCC-13



THE

MADHYAMAVYÂYOGA, DÛTAVÂKYA, DÛTAGHAṬOTKACHA, KARṆABHÂRA AND ÛRUBHANGA

OF

BHÂSA

EDITED WITH NOTES

BY

T GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts,

TRIVANDRUM

Bhasa's Works:—Nos. **6, 7, 8, 9 & 10.**

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM.

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1912.

(*All Rights Reserved.*)

अनन्तशयनसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः २२.

मध्यमव्यायोगः, दूतवाक्यं, दूतघटोत्कचं, कर्णभारम्, ऊरुभङ्गम्

इत्येतानि

महाकविश्रीभासप्रणीतानि

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितानि

लघुटिप्पण्या च संयोजितानि ।

भासनाटकचक्रे षष्ठसप्तमाष्टमनवमदशमानि ।

तानि च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितानि ।

कोल्लम्वाब्दाः १०८८, क्रैस्ताब्दाः १९१२.

PREFACE.

This volume contains the following five plays, (1) Madhyamavyâyoga, (2) Dûtavâkya, (3) Dûtaghaṭotkacha, (4) Karṇabhâra and (5) Urubhanga, each of which consists of a single Act. In the first of these plays, Bhîmasena is represented as rescuing a brahmin family from the hands of Ghaṭotkacha, in the second, Srîkrishṇa acting the part of a messenger on behalf of the Pâṇḍavas to the court of Duryodhana, in the third, Ghaṭotkacha instigated by Srîkrishṇa who became indignant at the murder of Abhimanyu serving as a messenger to Duryodhana's party, in the fourth, Karṇa bestowing on Indra Kavacha and Kuṇḍala as boon, and in the last, Bhîmasena smashing Duryodhana's thighs in the fight with gadas.

In the introduction to Swapnavâsavadatta, reference was made to the fragment of a play with no name. It is now learnt to be 'Dûtavâkya', a complete copy (a worn out manuscript marked ख) of the same with colophon, **'दूतवाक्यं समाप्तम्'** subsequently being obtained from Mr. Subrahmanyan Moottatu of Harippad. The same manuscript contains also a complete copy (marked ख) of the play, Karṇabhâra with the aid of which the portions lost at the beginning and at the end of the copy क of the same were inserted. If the title Karṇabhâra i. e. responsibility of Karṇa as a commander is to be significant it seems probable that the play can have at least one Act more to describe the feats of Karṇa.

Of these plays, Dûtavâkya alone contains no Prakrit dialects.

While Sanskrit dramas invariably end like comedies, the play, Ûrubhanga winds up with a tragic scene and Dûtaghaṭotkacha with neither.

TRIVANDRUM, T. GAṆAPATI SÂSTRÎ.

निवेदना ।

१. मध्यमव्यायोगः, २. दूतवाक्यम्, ३. दूतघटोत्कचम्, ४. कर्णभारम्, ५. ऊरुभङ्गम्, इति पञ्च रूपकाणि एकाङ्कात्मकानि अस्मिन् पुस्तके क्रमेण सन्निवेशितानि ।

मध्यमव्यायोगे भीमसेनेन ब्राह्मणकुटुम्बस्य घटोत्कचात् परित्राणं, दूतवाक्ये श्रीकृष्णेन पाण्डवार्थे दुर्योधनसभायां दूत्यकरणं, दूतघटोत्कचेऽभिमन्युवधकुपितश्रीकृष्णचोदितस्य घटोत्कचस्य दुर्योधनपक्षे दूतकर्मकरणं, कर्णभारे कर्णस्य शक्राय कवचकुण्डलार्पणम्, ऊरुभङ्गे भीमेन गदायुद्धे दुर्योधनोरुभञ्जनं च प्रतिपाद्यं वस्तु ।

यत्तदनवगतनामकं किञ्चिदुपक्रान्तविच्छिन्नं रूपकं स्वप्नवासवदत्तोपोद्घाते निर्दिष्टं, कृष्णतन्त्रिसकाशाधिगतेऽप्यादर्शे तथाविधमेव दृष्टं, तदेव नाम्ना 'दूतवाक्यम्' इति पश्चादवगतम् । तस्य हि समग्रं शरीरं पुत्तियल् सुब्रह्मण्यमूत्तुसकाशोपलब्धे जीर्णतालपत्रसम्पुटे ख.संज्ञे स्थितं, नाम च ग्रन्थान्ते 'दूतवाक्यं समाप्तम्' इति लिखितं दृष्टम् । तत्रैव च तालपत्रसम्पुटे कर्णभारस्याप्येकं प्रतिरूपान्तरमुपलब्ध ख.सञ्ज्ञं, यद्वशात् कर्णभारादर्शस्य क.संज्ञस्याद्यन्तांशवैकल्यं परिहर्तुं पारितम् । इदं त्वत्र प्रतिभाति —'कर्णभार'-संज्ञास्वरसात् कर्णस्य भारः सैनापत्यनिर्वाहोऽत्र प्राधान्येन प्रतिपाद्यः प्रतीयते । तेन कर्णपराक्रमणप्रकारशंसी उत्तराङ्कोऽप्यस्य संभाव्यत इति ।

एषु दूतवाक्ये प्राकृतव्यवहारो न विद्यते ।

उपलभ्यमानेषु संस्कृतरूपकेषु सर्वेषु कथावस्तुनः शुभावसानत्वमव्यभिचरितमित्येष लोकविदितोऽर्थः । ऊरुभङ्गे तु तस्य दुःखान्तत्वं, दूतघटोत्कचे चानुभयावसानत्व दृश्यत इति विशेषो वर्तते ।

अनन्तशयनम्.

त. गणपतिशास्त्री.

॥ श्रीः ॥

श्रीगणेशायनमः ।

महाकविश्रीभासप्रणीतः

मध्यमव्यायोगः ।

(ततः प्रविशति सूत्रधारः)

सूत्रधारः —

पायात् स वोऽसुरवधूहृदयावसादः
पादो हरेः कुवलयामलखड्गनीलः ।
यः प्रोद्यतस्त्रिभुवनैकभणे रराज
वैदूर्यसङ्क्रम इवाम्बुजभाजनस्थ ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

भोस्तात ! कोनुखल्वेषः ।

सूत्रधारः — भवतु, विज्ञातम् ।

भोःशब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः ।
त्रास्यते निर्विशङ्केन (केन)चित् पापचेतसा ॥ २ ॥

(नेपथ्ये)

भोस्तात! कोनुखल्वेषः ।

सूत्रधारः—हन्त दृढं विज्ञातम्। एष खलु पाण्डवमध्यमस्यात्मजो हिडिम्बारणिसम्भूतो राक्षसा(नि?म्नि)रकृतवैरं ब्राह्मणजनं वित्रासयति। भोः! कष्टं कष्टं खलु पत्नीसुतपरिवृतस्य ब्राह्मणस्य वृत्तान्तः। अत्र हि,

श्रान्तैः सुतैः परिवृतस्तरुणैः सदारो
वृद्धो द्विजो निशिचरानुचरः स एषः।
व्याघ्रानुसारचरितो वृषभः सधेनुः
सन्त्रस्तवत्स(क) इवाकुलतामुपैति ॥ ३ ॥

(निष्क्रान्त.)

स्थापना ।

(ततः प्रविशति सुतत्रयकलत्रपरिवृतः केशवदासः पृष्ठतो घटोत्कचश्च)

वृद्धः—भोः! कोनुखल्वेषः,

(त?अ)रुणरविकरप्रकीर्णकेशो
भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः ।
सतडिदिव घनः सकण्ठसूत्रो
†युगनिधने प्रतिमाकृतिर्हरस्य ॥ ४ ॥

---

† युगनिधने युगसंहारे प्रवृत्तस्येति शेषः ।

प्रथमः — भोस्तात! कोनुखल्वेषः ।

ग्रह(नि?यु)गलनिभाक्षः पीनविस्तीर्णवक्षाः
कनककपिशकेशः पीतकौशेयवासाः ।
तिमिरनिवहवर्णः पाण्डरोद्वृत्तदंष्ट्रो
नव इव ‡जलगर्भो लीयमानेन्दुलेखः ॥ ५ ॥

द्वितीयः — क एष भोः!

कलभदशनदंष्ट्रो लाङ्गलाकारनासः
करिवरकरबाहुर्नीलजीमूतवर्णः ।
हुतहुतवहदीप्तो यः स्थितो भाति भीम-
स्त्रिपुरपुरनिहन्तुः शङ्करस्येव रोषः ॥ ६ ॥

तृतीयः — भोस्तात! कोनुखल्वस्मान् पीडयति ।

वज्रपातोऽचलेन्द्राणां श्येनः सर्वपतत्रिणाम् ।
मृगेन्द्रो मृगसङ्घानां मृत्युः पुरुषविग्रहः ॥ ७ ॥

ब्राह्मणी — (क) अय्य! को एसो अह्माअं सन्दावेइ ।

घटोत्कचः — भो ब्राह्मण! तिष्ठ तिष्ठ ।

किं यासि मद्भयविनाशितधैर्यसारो
वित्रस्तदारसुतरक्षणहीनशक्ते! ।

(क) आर्य! क एषोऽस्मान् सन्तापयति ।

---

‡ जलगर्भो मेघः ।

तार्क्ष्यास्यपक्षपवनोद्धतरोषवह्नि-
तीव्रः कलत्रसहितो भुजगो यथार्तः ॥ ८ ॥

भो ब्राह्मण! न गन्तव्यं न गन्तव्यम् ।

वृद्धः — ब्राह्मणि! न भेतव्यम् । पुत्रकाः! न भेतव्यम्।

सविमर्शा ह्यस्य वाणी ।

घटोत्कचः — भोः! कष्टम् ।

जानामि सर्वत्र सदा च नाम
द्विजोत्तमाः पूज्यतमाः पृथिव्याम् ।
अकार्यमेतच्च मयाद्य कार्यं
मातुर्नियोगादपनीतशङ्कम् ॥ ९ ॥

वृद्धः — ब्राह्मणि! किं न स्मरसि तत्रभवता जलक्लिन्नेन मुनिनोक्तम — अनेपतराक्षसमिदं वनमप्रमादेन गन्तव्यमिति। तदेवोत्पन्नं भयम् ।

ब्राह्मणी — (क) किं दाणिं अय्यो मज्झत्थवण्णो* विअ दिस्सदि ।

वृद्धः — किं करिष्यसि मन्दभाग्यः ।

(क) किमिदानीमार्यो मध्यस्थवर्ण इव दृश्यते ।

---

* मध्यस्थवर्ण इव क्षत्रिय इव ।

ब्राह्मणी—(क) णं विक्कोसामो ।

प्रथमः—भवति! कस्य वयं विक्रोशामः ।

इदं हि शून्यं तिमिरोत्करप्रभै-
र्नगप्रकारैरवरुद्धदिक्पथम् ।
खगैर्मृगैश्चापि समाकुलान्तरं
वनं निवासाभिमतं मनस्विनाम् ॥ १० ॥

वृद्धः—ब्राह्मणि! न भेतव्यं न भेतव्यम् । मनस्वि-जननिवासयोग्यमिति श्रुत्वा विगत इव मे सन्त्रासः । शङ्के नात्रातिदूरेण पाण्डवाश्रमेण भवितव्यम्। पाण्डवास्तु,

युद्धप्रियाश्च शरणागतवत्सलाश्च
दीनेषु पक्षपतिताः कृतसाहसाश्च ।
एवंविधप्रतिभयाकृतिचेष्टितानां
दण्डं यथार्हमिह धारयितुं समर्थाः ॥ ११ ॥

प्रथमः—भोस्तात! न तत्र पाण्डवा इति मन्ये ।

वृद्धः—पुत्र! कथं त्वं जानीषे ।

प्रथमः—तस्मादाश्रमादागतेन केनचिद् ब्राह्मणेन (कथितं)—शतकुम्भं नाम यज्ञमनुभवितुं महर्षेर्धौम्यस्याश्रमं गता इति ।

(क) ननु विक्रोशामः ।

वृद्धः — हन्त हताः स्मः ।

प्रथमः — तात ! न तु सर्व एव । आश्रमपरिपालनार्थमिह स्थापितः किल मध्यमः ।

वृद्धः — यद्येवं, सन्निहिताः सर्व एव पाण्डवाः ।

प्रथमः — स चाप्यस्यां वेलायां व्यायामपरिचयार्थं वि(प्र)-कृष्टदेश इति श्रूयते ।

वृद्धः — हन्त निराशाः स्मः । भवतु, पुत्र ! व्यपश्रयि-ष्ये तावदेनम् ।

प्रथमः — अलमलं परिश्रमेण ।

वृद्धः — पुत्रं(निवेदप्यर्थिनी ?) खलु प्रार्थना । भवतु, पश्यामस्तावत् । भोः पुरुष ! अस्त्यस्माकं मोक्षः ।

घटोत्कचः — मोक्षोऽस्ति समयतः ।

वृद्धः — कः समयः ।

घटोत्कचः — अस्ति मे तत्रभवती जननी । तयाहमा-ज्ञप्तः — पुत्र ! ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चिन्मा-नुषः परिमृग्यानेतव्य इति । ततो मयासादितो भवान् ।

पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि ।
बलाबलं परिज्ञाय पुत्रमेकं विसर्जय ॥ १२ ॥

वृद्धः—हं भो राक्षसापशद !

किमहं श्रुतवान् वृद्धः पुत्रं शीलगुणान्वितम् ।
पुरुषादस्य दत्त्वा हा कथं निर्वृतिमाप्नुयाम् ॥ १३ ॥

घटोत्कचः—

यद्यर्थितो द्विजश्रेष्ठ ! पुत्रमेकं न मुञ्चसि ।
सकुटुम्बः क्षणेनैव विनाशमुपयास्यसि ॥ १४ ॥

वृद्धः—एष एव मे निश्चयः ।

कृतकृत्यं शरीरं मे परिणामेन जर्जरम् ।
राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ १५ ॥

ब्राह्मणी—(क) अय्य! मा मा एवं । पदिमत्तधम्मिणी पदिव्वदत्ति णाम । गहीदफळेण एदिणा सरीरेण अय्यं कुळं च रक्खिदुं इच्छामि ।

घटोत्कचः—न खलु स्त्रीजनोऽभिमतस्तत्रभवत्या ।

वृद्धः—अहमनुगमिष्यामि भवन्तम् ।

घटोत्कचः—आ वृद्धस्त्वमपसर ।

प्रथमः—भोस्तात ! ब्रवीमि खलु तावत् किञ्चित् ।

(क) आर्ये ! मा मैवम् । पतिमात्रधर्मिणी पतिव्रतेति नाम । गृहीतफलेनैतेन शरीरेणार्यं कुलं च रक्षितुमिच्छामि ।

वृद्धः—पुत्र कथय ।

प्रथमः—

मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम् ।
रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान् ॥ १६ ॥

द्वितीयः—आर्य! मा मैवम् ।

ज्येष्ठः श्रेष्ठः कुले लोके पितॄणां च सुसम्प्रियः ।
ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मर ॥ १७ ॥

तृतीयः—आर्यौ! मा मैवम् ।

ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः ।
ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम् ॥ १८ ॥

प्रथमः—वत्स! मा मैवम् ।

आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते ।
ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ॥ १९ ॥

वृद्धः—ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम् ।

ब्राह्मणी—(क) जह अय्यो जेट्ठमिच्छदि, तह अहं पि कणिट्ठं इच्छामि ।

द्वितीयः—पित्रोरनिष्टः कस्येदानीं प्रियः ।

(क) यथार्यो ज्येष्ठमिच्छति, तथाहमपि कनिष्ठामिच्छामि ।

घटोत्कचः—अहं प्रीतोऽस्मि, शीघ्रमागच्छ ।

द्वितीयः—

धन्योऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिता ।
बन्धुस्नेहाद्धि महतः कालस्नेहस्तु दुर्लभः ॥ २० ॥

घटोत्कचः—अहो स्वजनवात्सल्यमस्य ब्राह्मणवटोः ।

द्वितीयः—भोस्तात! अभिवादये ।

वृद्धः—एह्येहि पुत्र!

विनिमाय गुरुप्राणान् स्वैः प्राणैर्गुरुवत्सल! ।
अकृतात्मदुरावापं ब्रह्मलोकमवाप्नुहि ॥ २१ ॥

द्वितीयः—अनुगृहीतोऽस्मि । अम्ब! अभिवादये ।

ब्राह्मणी—(क) जाद! चिरं जीव ।

द्वितीयः—अनुगृहीतोऽस्मि । आर्य! अभिवादये ।

प्रथमः—एह्येहि वत्स!

परिष्वजस्व गाढं मां परिष्वक्तः शुभैर्गुणैः ।
कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा ॥ २२ ॥

द्वितीयः—अनुगृहीतोऽस्मि ।

तृतीयः—आर्य! अभवादिये ।

(क) जात! चिरं जीव ।

द्वितीयः— स्वस्ति ।

तृतीयः— अनुगृहीतोऽस्मि ।

द्वितीयः— भोः पुरुष ! ब्रवीमि किञ्चित् ।

घटोत्कचः— ब्रूहि ब्रूहि शीघ्रम् ।

द्वितीयः— एतस्मिन् वनान्तरे जलाशय इव दृश्य-
मे प्रकल्पितपरलोकस्य पिपासाप्रतीकारं करिष्यामि ।

घटोत्कचः— दृढव्यवसायिन् ! गम्यताम् । अयं
मातुराहारकालः । शीघ्रमागच्छ ।

द्वितीयः— भोस्तात ! एष गच्छामि । (निष्क्रान्तः)

वृद्धः— हा हा परिमुषिताः स्मो भोः ! परिमुषित-

यस्मिंश्रृङ्गो मम त्वासीन्मनोज्ञो वंशपर्वतः ।
स मध्यश्रृङ्गभङ्गेन मनस्तपति मे भृशम् ॥ २ ॥

हा पुत्र ! । कथं गत एव ।

तरुण ! तरुणतानुरूपकान्ते !
नियमपराध्ययनप्रसक्तबुद्धे ! ।
कथमिह गजराजदन्त(म?भ)म-
स्तरुरिव यास्यसि पुष्पितो विनाशम् ॥ २ ॥

घटोत्कचः— चिरायते खलु ब्राह्मणबटुः । अयं

मातुराहारकालः । किन्नुखलु करिष्ये । भवतु दृष्टम् । भो ब्राह्मण ! आहूयतां तव पुत्रः ।

वृद्धः — अतिराक्षसं खलु ते वचनम् ।

घटोत्कचः — कथं रुष्यति, मर्षयतु मर्षयतु भवान् । अयं मे प्रकृतिदोषः । अथ किन्नामा तव पुत्रः ।

वृद्धः — एतदपि न शक्यं श्रोतुम् ।

घटोत्कचः — युक्तं भोः! । ब्राह्मणकुमार ! किन्नामा ते भ्राता ।

प्रथमः — तपस्वी मध्यमः ।

घटोत्कचः — मध्यम इति सदृशमस्य । अहमेव यास्यामि । भो भो मध्यम ! मध्यम ! शीघ्रमागच्छ ।

(ततः प्रविशति भीमसेनः)

भीमसेनः — भोः ! कस्यायं स्वरः ।

खगशतविरुते विरौति तारं
द्रुमगहने दृढसङ्कटे वनेऽस्मिन् ।
जनयति च मनोज्वरं स्वरोऽयं
बहुसदृशो हि धनञ्जय(स्वर)स्य ॥ २५ ॥

घटोत्कचः — चिरायते खलु ब्राह्मणवटुः । अतिक्रामति मातुराहारकालः । किन्नुखलु करिष्ये । भवतु दृष्टम् । उच्चैः

शब्दापयामि । भो मध्यम ! शीघ्रमागच्छ ।

भीमसेनः—भोः ! कोनुखल्वेतस्मिन् वनान्तरे मम व्यायामविघ्नमुत्पाद्य मध्यम ! मध्यम ! इति मां शब्दापयति । भवतु, पश्यामस्तावत् । (परिक्रम्यावलोक्य) अहो दर्शनीयोऽयं पुरुषः । अयं हि,

सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रुभ्रूः श्येननासो द्विरदपतिहनुर्दीर्घविश्लिष्टकेशः ।
व्यूढोरु वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः ॥ २६ ॥

घटोत्कचः—चिरायते खलु ब्राह्मणवटुः । अतिक्रामति मातुराह्वानकालः । किमिदानीं करिष्ये । भवतु, उच्चैराह्वानं करिष्ये । भो भो मध्यम ! शीघ्रमागच्छ ।

भीमसेनः—भोः प्राप्तोऽस्मि ।

घटोत्कचः—न खल्वयं ब्राह्मणवटुः । अहो दर्शनीयोऽयं पुरुषः । य एषः,

सिंहाकृतिः कनकतालसमानबाहु-
र्मध्ये तनुर्गरुडपक्षविलिप्तपक्षः ।
विष्णुर्भवेद् विकसिताम्बुजपत्रनेत्रो
नेत्रे ममाहरति बन्धुरिवागतोऽयम् ॥ २७ ॥

---

§ 'उर. प्रभृतिभ्य कप्' (५-४-१५१) इति निर्योऽपि कबिह न कृतः ।

भो मध्यम! त्वां खल्वहं शब्दापयामि ।

भीमसेनः—अतः खल्वहं प्राप्तः ।

घटोत्कचः—किं भवानपि मध्यमः ।

भीमसेनः—न तावदपरः ।

मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः ।
मध्यमोऽहं क्षितेर्भद्र! भ्रातॄणामपि मध्यमः ॥ २८ ॥

घटोत्कचः—भवितव्यम् ।

भीमसेनः—अपिच,

मध्यमः पञ्चभूतानां पार्थिवानां च मध्यमः ।
भवे च मध्यमो लोके सर्वकार्येषु मध्यमः ॥ २९ ॥

वृद्धः—
‡मध्यमस्त्विति सम्प्रोक्ते नूनं पाण्डवमध्यमः ।
अस्मान् मोक्तुमिहायातो दर्पान्मृत्योरिवोत्थितः ॥ ३० ॥

(प्रविश्य)

मध्यमः—
अस्यामाचम्य पद्मिन्यां परलोकेषु दुर्लभम् ।
आत्मनैवात्मनो दत्तं पद्मपत्रोज्ज्वलं जलम् ॥ ३१ ॥

(उपगम्य) भोः पुरुष! प्राप्तोऽस्मि ।

---

‡ 'भो मध्यमे'ति पठनीय भाति ।

घटोत्कचः—प्राप्तवानिदानीं खल्वसि । मध्यम! मध्यम! इत इतः ।

वृद्धः—(भीममुपगम्य) भो मध्यम! परित्रायस्व ब्राह्मणकुलम् ।

भीमसेनः—न मेतव्यं न मेतव्यम् । मध्यमोऽहमभिवादये ।

वृद्धः—वायुरिव दीर्घायुर्भव ।

भीमसेनः—अनुगृहीतोऽस्मि । कुतो भयमार्यस्य ।

वृद्धः—श्रूयताम् । अहं खलु कुरुराजेन युधिष्ठिरेणाधिष्ठितपूर्वे कुरुजाङ्गले यूथग्रामवास्तव्यो माठरसगोत्रश्च कल्पशाखाध्वर्युः केशवदासो नाम ब्राह्मणः । तस्य ममोत्तरस्यां दिश्युद्यानकग्रामवासी मातुलः कौशिकसगोत्रो यज्ञबन्धुर्नामास्ति । तस्य पुत्रोपनयनानुभवनार्थं सकलत्रोऽस्मि प्रस्थितः ।

भीमसेनः—अरिष्टोऽस्तु पन्थाः । ततस्ततः ।

वृद्धः—ततो माभैष हि,

सजलजलदगात्रः पद्मपत्रायताक्षो
नृगपतिगतिलीलो राक्षसः प्रोग्रदंष्ट्रः ।
जगति विगतशङ्कस्त्वद्विधानां समक्षं
ससुतपरिजनं भो! हन्तुकामोऽभ्युपैति ॥ ३२ ॥

भीमसेनः—एवम्, अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः। भवतु, निग्रहीष्यामि तावदेनम्। भोः पुरुष! तिष्ठ तिष्ठ।

घटोत्कचः—एष स्थितोऽस्मि ।

भीमसेनः—किमर्थं ब्राह्मणं प(र?रा)स्यसि† ।

पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च ।
वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिवागतः ॥ ३३ ॥

घटोत्कचः—अथकिम् । राहुरेव ।

भीमसेनः—आः,

निवृत्तव्यवहारोऽयं सद्दारस्तनयैः सह ।
सर्वापराधेऽवध्यत्वान्मुच्यतां द्विजसत्तमः ॥ ३४ ॥

घटोत्कचः—न मुच्यते ।

भीमसेनः—(आत्मगतम्) भोः! कस्य पुत्रेणानेन भवितव्यम् ।

भ्रातॄणां मम सर्वेषां कोऽयं भो! गुणतस्करः ।
दृष्ट्वैतद् बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम् ॥ ३५॥

(प्रकाशम्) भोः पुरुष! मुच्यताम् ।

घटोत्कचः—न मुच्यते ।

---

† परास्यसि निरस्यसीत्यर्थः ।

मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता ।
न मुच्यते तथाह्येष गृहीतो मातुराज्ञया ॥ ३६ ॥

भीमसेनः — (आत्मगतम्) कथं मातुराज्ञेति । अहो गुरुशुश्रूषुः खल्वयं तपस्वी ।

माता किल मनुष्याणां दैवतानां च दैवतम् ।
मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः ॥ ३७ ॥

(प्रकाशम्) भोः पुरुष ! प्रष्टव्यं खलु तावदस्ति ।

घटोत्कचः — ब्रूहि ब्रूहि शीघ्रम् ।

भीमसेनः — का नाम भवतो माता ।

घटोत्कचः — हिडिम्बा नाम राक्षसी ।

कौरव्यकुलदीपेन पाण्डवेन महात्मना ।
सनाथा या महाभागा पूर्णेन द्यौरिवात्मना* ॥ ३८ ॥

भीमसेनः — (आत्मगतम्) एवं, हिडिम्बायाः पुत्रोऽयम् । सदृशो ह्यस्य गर्वः ।

रूपं सत्त्वं बलं चैव पितृभिः सदृशं बहु ।
प्रजासु वीतकारुण्यं मनश्चैवास्य कीदृशम् ॥ ३९ ॥

(प्रकाशम्) भोः पुरुष ! मुच्यताम् ।

घटोत्कचः — न मुच्यते ।

---

* आत्मना चन्द्रेण । 'आत्मार्कचन्द्रवानाग्निजीवेषु परमात्मनि' इति केशवस्वामी ।

भीमसेनः—भो ब्राह्मण ! गृह्यतां तव पुत्रः । वयमेनमनुगमिष्यामः ।

द्वितीयः—मा मा भवानेवम् ।

त्यक्ताः प्रागेव मे प्राणा गुरुप्राणेष्वपेक्षया ।
युवा रूपगुणोपेतो भवांस्तिष्ठतु भूतले ॥ ४० ॥

भीमसेनः—आर्य ! मा मैवम् । क्षत्रियकुलोत्पन्नोऽहम् । पूज्यतमः खलु ब्राह्मणः । तस्मान्मच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि ।

घटोत्कचः—एवं, क्षत्रियोऽयम् । तेन गर्वः । भवतु, इममेव हत्वा नेष्यामि । अथ केनायं वारितः ।

भीमसेनः—मया ।

घटोत्कचः— किं त्वया ।

भीमसेनः— अथकिम् ।

घटोत्कचः—तेन हि भवानेवागच्छतु ।

भीमसेनः— एवम्, अतिवीर्यबलं नानुगच्छामि । यदि ते शक्तिरस्ति, बलात्कारेण मां नय ।

घटोत्कचः— किं मां प्रत्यभिजानीते भवान् ।

भीमसेनः—मत्पुत्र इति जाने ।

घटोत्कचः— कथं कथं तव पुत्रोऽहम् ।

भीमसेनः— कथं रुष्यति, मर्षयतु मर्षयतु भवान् । सर्वाः प्रजाः क्षत्रियाणां पुत्रशब्देनाभिधीयन्ते । अत एव मयाभिहितम् ।

घटोत्कचः— भीतानामायुधं गृहीतम् ।

भीमसेनः—

शपामि सत्येन भयं न जाने
ज्ञातुं तदिच्छामि भवत्समीपे ।
किंरूपमेतद् वद भद्र! (तस्य)
गुणागुणज्ञः सदृशं प्रपत्स्ये ॥ ४१ ॥

घटोत्कचः— एष ते भयमुपदिशामि, गृह्यतामायुधम् ।

भीमसेनः— आयुधमिति । गृहीतमेतत् ।

घटोत्कचः— कथमिव ।

भीमसेनः—

काञ्चनस्तम्भसदृशो रिपूणां निग्रहे रतः ।
अयं तु दक्षिणो बाहुरायुधं सदृशं मम ॥ ४२ ॥

घटोत्कचः— इदमुपपन्नं पितुर्मे भीमसेनस्य ।

भीमसेनः— अथ कोऽयं भीमो नाम ।

विश्वकर्ता शिवः कृष्णः शक्रः शक्तिधरो यमः ।
एतेषु कथ्यतां भद्र ! केन ते सदृशः पिता ॥ ४३ ॥

घटोत्कचः — सर्वैः ।

भीमसेनः — धिगनृतमेतत् ।

घटोत्कचः — कथं कथम् । अनृतमित्याह । क्षिपसि मे गुरुम् । भवतु, इमं स्थूलं वृक्षमुत्पाट्य प्रहरामि । कथमनेनापि न शक्यते हन्तुम् । किन्नुखलु करिष्ये । भवतु, दृष्टम् । एतद् गिरिकूटमुत्पाट्य प्रहरामि ।

शैलकूटं मया क्षिप्तं प्राणानादाय यास्यति

भीमसेनः —

रुष्टोऽपि कुञ्जरो वन्यो न व्याघ्रं धर्षयेद् वने ॥ ४४ ॥

घटोत्कचः — कथमनेनापि न शक्यते हन्तुम् । किन्नुखलु करिष्ये । भवतु, दृष्टम् ।

नन्वहं भीमसेनस्य पुत्रः पौत्रो नभस्वतः
तिष्ठेदानीं सुसन्नद्धो नियुद्धे नास्ति मत्समः ॥ ४५ ॥

(इत्युभौ नियुद्ध कुरुतः)

घटोत्कचः — (भीमसेन बद्ध्वा)

व्रजसि कथमिह त्वं वीर्यमुल्लङ्घ्य बाह्वो-
र्गज इव दृढपाशैः पीडितो मद्भुजाभ्याम् ।

भीमसेनः — (आत्मगतम्) कथं गृहीतोऽस्म्यनेन । भोः सुयोधन ! वर्धते खलु शत्रुपक्षः । कृतरक्षो भव । (प्रकाशम्) भोः पुरुष ! अवहितो भव ।

घटोत्कचः — अवहितोऽस्मि ।

भीमसेनः — (नियुद्धबन्धमवधूय)

व्यपनय बलदर्पं दृष्टसारोऽसि वीर !
न हि मम परिखेदो विद्यते बाहुयुद्धे ॥ ४६ ॥

घटोत्कचः — कथमनेनापि न शक्यते हन्तुम् । किन्नु खलु करिष्ये । भवतु, दृष्टम् । अस्ति मातृप्रसादलब्धो मायापाशः । तेन बद्ध्वैनं नेष्यामि । कुतः खल्वापः । भो गिरे ! आपस्तावत् । हन्त स्रवति । (आचम्य मन्त्रं जपति) भोः पुरुष !

मायापाशेन बद्धस्त्वं विवशो न गमिष्यसि ।
गजसे रज्जुभिर्बद्धः शक्रध्वज इवोत्सवे ॥ ४७ ॥

(इति मायया बध्नाति)

भीमसेनः — कथं मायापाशेन बद्धोऽस्मि । किमिदानीं करिष्ये । अस्ति महेश्वरप्रसादलब्धो मायापाशमोक्षो मन्त्रः । तं जपामि । कुतः खल्वापः । भवतु, भो ब्राह्मणकुमार ! आनय कमण्डलुगता अपः ।

वृद्धः — इमा आपः ।

(भीमसेन आचम्य मन्त्र जप्त्वा मायां मोचयति)

घटोत्कचः — अये पतितः पाशः । किमिदानीं करिष्ये । भवतु, भोः पुरुष ! पूर्वसमयं स्मर ।

भीमसेनः — समय इति । एष स्मरामि । गच्छाग्रतः ।

(उभौ परिक्रामतः)

वृद्धः — पुत्रकाः ! किं कुर्मः । अयं गच्छति वृकोदरः ।

आक्रम्य राक्षसमिमं ज्वलदुग्ररूप-
मुग्रेण बाहुबलवीर्यगुणेन युक्तम् ।
एष प्रयाति शनकैरवधूय शीघ्र-
मासारवर्षमिव गोवृषभः सलीलः ॥ ४८ ॥

घटोत्कचः — इह तिष्ठ । त्वदागमनमम्बायै निवेदयामि ।

भीमसेनः — बाढम् । गच्छ ।

घटोत्कचः — (उपसृत्य) अम्ब ! अभिवादये घटोत्कचोऽहम् । चिराभिलषितो भवत्या आहारार्थमानीतो मानुषः ।

(प्रविश्य)

हिडिम्बा — (क) जाद ! चिरं जीव । कीदिसो माणुसो आणीदो ।

(क) जात ! चिरं जीव । कीदृशो मानुष आनीतः ।

घटोत्कचः—भवति! वाङ्मात्रेण मानुषो, न वीर्येण ।

हिडिम्बा—(क) किं बह्मणो ।

घटोत्कचः—न ब्राह्मणः ।

हिडिम्बा—(ख) आदु थेरो ।

घटोत्कचः—न वृद्धः ।

हिडिम्बा—(ग) किं वाळो ।

घटोत्कचः—न बालः ।

हिडिम्बा—(घ) जइ एव्वं, पेक्खामि दाव णं ।

(उभौ परिक्रामतः)

हिडिम्बा—(ङ) किं एसो माणुसो आणीदो ।

घटोत्कचः—भवति! कोऽयम् ।

हिडिम्बा—(च) उम्मत्तअ! दव्वदं खु अअं ।

(क) किं ब्राह्मणः ।

(ख) अथवा स्थविरः ।

(ग) किं बालः ।

(घ) यद्येवं, पश्यामि तावदेनम् ।

(ङ) किमेष मानुष आनीतः ।

(च) उन्मत्तक! दैवतं खल्वयम् ।

घटोत्कचः—आः कस्य दैवतम् ।

हिडिम्बा—(क) तव अ मम अ ।

घटोत्कचः—कः प्रत्ययः ।

हिडिम्बा—(ख) एसो पच्चओ । जेदु अय्यउत्तो ।

भीमसेनः—(विलोक्य) का पुनरियम् । अये देवी हिडिम्बा ।

अस्माकं भ्रष्टराज्यानां भ्रमतां गहने वने ।
जातकारुण्यया देवि! सन्तापो नाशितस्त्वया ॥ ४९ ॥

हिडिम्बे! किमिदम् ।

हिडिम्बा—(कर्णे) (ग) ईदिसं विअ ।

भीमसेनः—जात्या राक्षसी, न समुदाचारेण ।

हिडिम्बा—(घ) उम्मत्तअ! अभिवादेहि पिदरं ।

घटोत्कचः—भोस्तात! अहं स धार्तराष्ट्रवनदवाग्निर्घटोत्कचोऽभिवादये । पुत्रचापलं क्षन्तुमर्हसि ।

(क) तव च मम च ।

(ख) एष प्रत्ययः । जयत्वार्यपुत्रः ।

(ग) ईदृशमिव ।

(घ) उन्मत्तक! अभिवादय पितरम् ।

भीमसेनः — एह्येहि पुत्र! व्यतिक्रमकृतं कान्तमेव । (इति परिष्वज्य) धार्तराष्ट्रवनदवाग्निपुत्रापेक्षीणि पितृहृदयानि । पुत्र! अतिबलपराक्रमो भव ।

घटोत्कचः — अनुगृहीतोऽस्मि ।

वृद्धः — एवं, भीमसेनपुत्रोऽयं घटोत्कचः ।

भीमसेनः — पुत्र! अभिवादयात्रभवन्तं केशवदासम् ।

घटोत्कचः — भगवन्! अभिवादये ।

वृद्धः — पितृसदृशगुणकीर्तिर्भव ।

घटोत्कचः — अनुगृहीतोऽस्मि ।

वृद्धः — भो वृकोदर! रक्षितमस्मत्कुलं, स्वकुलमुद्धृतं च। गच्छामस्तावत् ।

भीमसेनः —

अनुग्रहात् तु भवतः सर्वमासीदिदं शुभम् ।
आश्रमोऽदूरतोऽस्माकं तत्र विश्रम्य गम्यताम् ॥ ५० ॥

वृद्धः — कृतमातिथ्यमनेन जीवितप्रदानेन । तस्माद्गच्छामस्तावत् ।

भीमसेनः — गच्छतु भवान् सकुटुम्बः पुनर्दर्शनाय ।

वृद्धः — बाढम् । प्रथमः कल्पः ।

(निष्क्रान्तः सकलत्रपुत्र. केशवदासः)

भीमसेनः — हिडिम्बे! इतस्तावत्। वत्स! घटोत्कच! इतस्तावत्। तत्रभवन्तं केशवदासमाश्रमपदद्वारमात्रमपि सम्भावयिष्यामः।

*यथा नदीनां प्रभवः समुद्रो
यथाहुतीनां प्रभवो हुताशः।
यथेन्द्रियाणां प्रभवं§ मनोऽपि
तथा प्रभुर्नो भगवानुपेन्द्रः॥ ५१॥

(निष्क्रान्ताः सर्वे)

मध्यमव्यायोगोऽवसितः॥

शुभं भूयात्।

---

* इतः प्राग् 'भरतवाक्यम्' इत्यपेक्षितं भाति। § प्रभवति ईष्टे इ'त प्रभवम् ईशितृ। पचाद्यच्।

॥ श्रीः ॥

श्रीगणेशायनमः ।

महाकविश्रीभासप्रणीतं

दूतवाक्यम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

भो भोः प्रतिहाराधिकृताः! महाराजो दुर्योधनः समाज्ञापयति ।

सूत्रधारः—भवतु, विज्ञातम् ।

उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह ।
मन्त्रशालां रचयति[1] भृत्यो दुर्योधनाज्ञया ॥ २ ॥

(निष्क्रान्तः)

स्थापना ।

---

१. 'पर्येति मन्त्रशालायां भृ' क. ख. पाठः.

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः—भो भोः प्रतिहाराधिकृताः! महाराजो दुर्योधनः समाज्ञापयति—अद्य सर्वपार्थिवैः सह मन्त्रयितुमिच्छामि। तदाहूयन्तां सर्वे राजान इति। (परिक्रम्यावलोक्य) अये अयं महाराजो दुर्योधन इत एवाभिवर्तते। य एषः,

श्यामो युवा सितदुकूलकृतोत्तरीयः
सच्छत्रचामरवरो रचिताङ्गरागः।
श्रीमान् विभूषणमणिद्युतिरञ्जिताङ्गो
नक्षत्रमध्य इव पर्वगतः शशाङ्कः ॥ ३ ॥

(ततः प्रविशति[1] यथानिर्दिष्टो दुर्योधनः)

दुर्योधनः—

उद्भूतरोषमिव मे हृदयं सहर्षं
प्राप्तं रणोत्सवमिमं सहसा विचिन्त्य।
इच्छामि पाण्डवबले वरवारणाना-
मुत्कृत्तदन्तमुसलानि मुखानि कर्तुम् ॥ ४ ॥

काञ्चुकीयः—जयतु महाराजः। महाराजशासनात् समानीतं सर्वराजमण्डलम्।

दुर्योधनः—सम्यक् कृतम्। प्रविश त्वमवरोधनम्।

काञ्चुकीयः—यदाज्ञापयति महाराजः। (निष्क्रान्तः)

---

१. 'ति दु' क, पाठः,

दुर्योधनः— आर्यौ ! वैकर्णवर्षदेवौ ! उच्यताम्— अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हति ।

किं किमाहतुर्भवन्तौ—महान् खल्वयमर्थः । मन्त्रयित्वा वक्तव्यमिति ।

सदृशमेतत्[1] । तदागम्यतां मन्त्रशालामेव प्रविशामः । आचार्य ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । पितामह ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । मातुल ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । आर्यौ ! वैकर्णवर्षदेवौ ! प्रविशतां भवन्तौ । भो भोः सर्वक्षत्रियाः ! स्वैरं प्रविशन्तु भवन्तः । वयस्य ! कर्ण ! प्रविशामस्तावत् ।

(प्रविश्य)

आचार्य ! एतत्[2] कूर्मासनम्, आस्यताम् । पितामह ! एतत्[3] सिंहासनम्, आस्यताम् । मातुल ! एतच्[4]चर्मासनम्, आस्यताम् । आर्यौ ! वैकर्णवर्षदेवौ ! आसातां भवन्तौ । भो भोः सर्वक्षत्रियाः ! स्वैरमासतां भवन्तः ।

किमिति किमिति महाराजो नास्त इति[†] । अहो सेवाधर्मः । नन्वयमहमासे । वयस्य ! कर्ण ! त्वमप्यास्स्व (उपविश्य)

---

१. 'द् आग' क ग. पाठः. २ 'तदासन' क. ग. पाठः. ३. 'तदासन' क. ग. पाठः. ४. 'तदासन' क ग. पाठः.

---

† किं ब्रूयेति शेषः ।

आर्यौ ! वैकर्णवर्षदेवौ ! उच्यताम्—अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हतीति ।

किमाहतुर्भवन्तौ—अत्रभवान् गान्धारराजो वक्ष्यतीति । भवतु, मातुलेनाभिधीयताम् ।

किमाह मातुलः—अत्रभवति गाङ्गेये स्थिते कोऽन्यः सेनापतिर्भवितुमर्हतीति ।

सम्यगाह मातुलः । भवतु भवतु । पितामह एव भवतु । वयमप्येतदभिलषामः ।

सेनानिनादपटहस्वनशङ्खनादै-
श्चण्डानिलाहतमहोदधिनादकल्पैः ।
गाङ्गेयमूर्ध्नि पतितैरभिषेकतोयैः
सार्धं पतन्तु हृदयानि नराधिपानाम् ॥ ५ ॥

(प्रविश्य)

काञ्चुकीयः—जयतु महाराजः । एष खलु पाण्डवस्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारयणः ।

दुर्योधनः—मा तावद् भो बादरायण ! । किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः । स गोपालकस्तव पुरुषोत्तमः । बार्हद्रथापहृतविषयकीर्त्तिभोगस्तव पुरुषोत्तमः । अहो पार्थिवासन्नमाश्रितस्य भृत्यजनस्य समुदाचारः । सगर्वं खल्वस्य वचनम् । आ अपध्वंस ! ।

काञ्चुकीयः — प्रसीदतु महाराजः । संभ्रमेण समुदाचारो विस्मृतः । (पादयोः पतति)

दुर्योधनः — संभ्रम इति । आ मनुष्याणामस्त्येव संभ्रमः । उत्तिष्ठोत्तिष्ठ ।

काञ्चुकीयः — अनुगृहीतोऽस्मि ।

दुर्योधनः — इदानीं प्रसन्नोऽस्मि । क एष दूतः प्राप्तः ।

काञ्चुकीयः — दूतः प्राप्तः केशवः ।

दुर्योधनः — केशव इति । एवमेष्टव्यम् । अयमेव समुदाचारः । भो भो राजानः! दौत्येनागतस्य केशवस्य किं युक्तम् । किमाहुर्भवन्तः— अर्घ्यप्रदानेन पूजयितव्यः केशव इति । न मे रोचते । ग्रहणमस्यात्र हितं पश्यामि ।

ग्रहणमुपगते तु वासुभद्रे
हृतनयना इव पाण्डवा भवेयुः ।
गतिमतिरहितेषु पाण्डवेषु
क्षितिरखिलापि भवेन्ममासपत्ना ॥ ६ ॥

अपिच योऽत्र केशवस्य प्रत्युत्थास्यति, स मया द्वादशसुवर्णभारेण दण्ड्यः । तदप्रमत्ता भवन्तु भवन्तः । कोनुखलु ममाप्रत्युत्था(प?)नस्योपायः । हन्त दृष्ट उपायः । बादरायण! आनीयतां स चित्रपटो ननु, यत्र द्रौपदीकेशाम्बरावकर्षणमालिखितम् । (अपवार्य) तस्मिन् दृष्टिविन्यासं कुर्वन् नोत्थास्यामि केशवस्य ।

काञ्चुकीयः — यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) जयतु महाराजः । अयं स चित्रपटः ।

दुर्योधनः — ममाग्रतः प्रसारय ।

काञ्चुकीयः — यदाज्ञापयति महाराजः । (प्रसारयति)

दुर्योधनः — अहो दर्शनीयोऽयं चित्रपटः । एष दुःशासनो द्रौपदीं केशहस्ते गृहीतवान् । एषा खलु द्रौपदी,

दुःशासनपरामृष्टा सम्भ्रमोत्फुल्ललोचना ।
राहुवक्त्रान्तरगता चन्द्रलेखेव शोभते ॥ ७ ॥

एष दुरात्मा भीमः सर्वराजसमक्षमवमानितां द्रौपदीं दृष्ट्वा प्रवृद्धामर्षः सभास्तम्भं तुलयति । एष युधिष्ठिरः,

सत्यधर्मघृणायुक्तो द्यूतविभ्रष्टचेतनः ।
करोत्यपाङ्गविक्षेपैः शान्तामर्षं वृकोदरम् ॥ ८ ॥

एष इदानीमर्जुनः,

रोषाकुलाक्षः स्फुरिताधरोष्ठ-
स्तृणाय मत्वा रिपुमण्डलं तत् ।
उत्सादयिष्यन्निव सर्वराज्ञः*
शनैः समाकर्षति गाण्डिवज्याम् ॥ ९ ॥

---

* समासान्तविधेरनित्यत्वमाश्रयणीयम् । 'सर्वराजान्' इति वा पाठो भवेत् ।

एष युधिष्ठिरोऽर्जुनं निवारयति । एतौ नकुलसहदेवौ,

कृतपरिकरबन्धौ चर्मनिस्त्रिंशहस्तौ
परुषितमुखरागौ स्पष्टदृष्टाधरोष्ठौ ।
विगतमरणशङ्कौ सत्वरं भ्रातरं मे
हरिमिव मृगपोतौ तेजसाभिप्रयातौ ॥ १० ॥

एष युधिष्ठिरः कुमारावुपेत्य निवारयति —

नीचोऽहमेव विपरीतमतिः कथं वा
रोषं परित्यजतमद्य नयानयज्ञौ ।
द्यूताधिकारमवमानममृष्यमाणाः
सत्त्वाधिकेषु वचनीयपराक्रमाः स्युः ॥ ११ ॥

इति । एष गान्धारराजः,

अक्षान् क्षिपन् $सकितवं प्रहसन् सगर्वं
सङ्कोचयन्निव मुदं द्विषतां स्वकीर्त्या ।
स्वैरासनो द्रुपदराजसुतां रुदन्तीं*
काक्षेण पश्यति लिखत्य(भिखां ?) नयज्ञः ॥ १२ ॥

एतावाचार्यपितामहौ तां दृष्ट्वा लज्जायमानौ पटान्तान्तर्हित-मुखौ स्थितौ । अहो अस्य वर्णाढ्यता । अहो भावोपपन्नता । अहो युक्तलेखता । सुव्यक्तमालिखितोऽयं चित्रपटः । प्रीतोऽस्मि । कोऽत्र ।

$ सकैतवमित्यर्थः । 'स कितव.' इति वा पाठे भवेत् । * रुदधातोस्तुदादित्वमार्षत एव प्रयोगात् कल्प्यम् ।

काञ्चुकीयः — जयतु महाराजः ।

दुर्योधनः — बादरायण ! आनीयतां स विहगवाहनमात्र-

विस्मितो दूतः ।

काञ्चुकीयः — यदाज्ञापयति महाराजः । (निष्क्रान्तः)

दुर्योधनः — वयस्य ! कर्ण !

प्राप्तः किलाद्य वचनादिह पाण्डवानां
दौत्येन भृत्य इव कृष्णमतिः स कृष्णः ।
श्रोतुं सखे ! त्वमपि सज्जय कर्ण ! कर्णौ
‡नारीमृदूनि वचनानि युधिष्ठिरस्य ॥ १३ ॥

(ततः प्रविशति वासुदेवः काञ्चुकीयश्च)

वासुदेवः — अद्य खलु धर्मराजवचनाद् धनञ्जयाकृत्रिम-मित्रतया चाहवदर्पमनुक्तग्राहिणं सुयोधनं प्रति मयाप्यनुचित-दौत्यसमयोऽनुष्ठितः । अथच,

कृष्णापराभवभुवा रिपुवाहिनीभ-
कुम्भस्थलीदलनतीक्ष्णगदाधरस्य ।
भीमस्य कोपशिखिना युधि पार्थपाच्चि-
चण्डानिलैश्च कुरुवंशवनं विनष्टम् ॥ १४ ॥

इदं सुयोधनशिबिरम् । इह हि,

---

‡ नारीमृदूनि स्त्रीवचनाविक्लवानि । वृत्तौ नारीशब्दो नारीसमवेतवचनक्रियावर्ती ।

आवासाः पार्थिवानां सुरपुरसदृशाः स्वच्छन्दविहिता
विस्तीर्णाः शस्त्रशाला बहुविधकर(रै?णै)ः शस्त्रैरुपचिताः ।
हेषन्ते मन्दुरास्थास्तुरगवरघटा बृंहन्ति करिण
ऐश्वर्यं स्फीतमेतत् स्वजनपरिभवादासन्नविलयम् ॥ १५ ॥

भोः !

दुष्टवादी गुणद्वेषी शठः स्वजनानिर्दयः ।
सुयोधनो हि मां दृष्ट्वा नैव कार्यं करिष्यति ॥ १६ ॥

भो बादरायण ! किं प्रवेष्टव्यम् ।

काञ्चुकीयः — अथकिमथकिम् । प्रवेष्टुमर्हति पद्मनाभः ।

वासुदेवः — (प्रविश्य) कथं कथं मां दृष्ट्वा संभ्रान्ताः सर्वक्षत्रियाः । अलमलं संभ्रमेण । स्वैरमासतां भवन्तः ।

दुर्योधनः — कथं कथं केशवं दृष्ट्वा संभ्रान्ताः सर्वक्षात्रियाः । अलमलं संभ्रमेण । स्मरणीयः पूर्वमाश्रावितो दण्डः । नन्वहमाज्ञप्ता ।

वासुदेवः — भोः सुयोधन ! किमास्से ।

दुर्योधनः — (आसनात् पतित्वा आत्मगतम्) सुव्यक्तं प्राप्त एव केशवः ।

उत्साहेन मतिं कृत्वाप्यासीनोऽस्मि समाहितः ।
केशवस्य प्रभावेन चलितोऽस्म्यासनादहम् ॥ १७ ॥

अहो बहुमायोऽयं दूतः । (प्रकशम्) भो दूत! एतदासनमास्यताम् ।

वासुदेवः—आचार्य! आस्यताम्। गाङ्गेयप्रमुखा राजानः! स्वैरमासतां भवन्तः । वयमप्युपविशामः । (उपविश्य) अहो दर्शनीयोऽयं चित्रपटः। मा तावत् । द्रौपदीकेशधर्षणमत्रालिखितम् । अहोतुखलु,

सुयोधनोऽयं स्वजनावमानं
पराक्रमं पश्यति बालिशत्वात् ।
को नाम लोके स्वयमात्मदोष-
मुद्घाटयेन्नष्टघृणः सभासु ॥ १८ ॥

आः अपनीयतामेष चित्रपटः ।

दुर्योधनः— बादरायण! अपनीयतां किल चित्रपटः ।

काञ्चुकीयः— यदाज्ञापयति महाराजः । (अपनयति)

दुर्योधनः—भो दूत!

धर्मात्मजो वायुसुतश्च भीमो
भ्रातार्जुनो मे त्रिदशेन्द्रसूनुः ।
यमौ च तावश्विसुतौ विनीतौ
सर्वे सभृत्याः कुशलोपपन्नाः ॥ १९ ॥

वासुदेवः—सदृशमेतद् गान्धारीपुत्रस्य। अथकिमथकिम् ।

कुशलिनः सर्वे। भवतो राज्ये शरीरे बाह्याभ्यन्तरे च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादयः पाण्डवाः—

अनुभूतं महद् दुःखं संपूर्णः समयः स च ।
अस्माकमपि धर्म्यं यद् दायाद्यं तद् विभज्यताम् ॥ २० ॥

इति ।

दुर्योधनः— कथं कथं दायाद्यमिति ।

वने पितृव्यो मृगयाप्रसङ्गतः
कृतापराधो मुनिशापमाप्तवान् ।
तदाप्रभृत्येव स दारनिस्पृहः
परात्मजानां पितृतां कथं व्रजेत् ॥ २१ ॥

वासुदेवः— पुराविदं भवन्तं पृच्छामि ।

विचित्रवीर्यो विषयी विपत्तिं
क्षयेण यातः पुनरम्बिकायाम् ।
व्यासेन जातो धृतराष्ट्र एष
लभेत राज्यं जनकः कथं ते ॥ २२ ॥

मा मा भवान्,

एवं परस्परविरोधविवर्धनेन
शीघ्रं भवेत् कुरुकुलं नृप! नामशेषम् ।
तत् कर्तुमर्हति भवानपकृष्य रोषं
यत् त्वां युधिष्ठिरमुखाः प्रणयाद् ब्रुवन्ति ॥ २३ ॥

दुर्योधनः — भो दूत ! न जानाति भवान् राज्यव्यवहारम् ।

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनर्दीनाय वा दीयते ।
काङ्क्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसं
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम् ॥ २४ ॥

वासुदेवः — भोः सुयोधन ! अलं बन्धुजने परुषमभिधातुम् ।

पुण्यसञ्चयसम्प्राप्तामधिगम्य नृपश्रियम् ।
यश्चयेद् यः सुहृद्बन्धून् स भवेद् विफलश्रमः ॥ २५ ॥

दुर्योधनः —

स्यालं तव गुरोर्भूपं कंसं प्रति न ते दया ।
कथमस्माकमेवं स्यात् तेषु नित्यापकारिषु ॥ २६ ॥

वासुदेवः — अलं तन्मद्दोषतो ज्ञातुम् ।

कृत्वा पुत्रवियोगार्तां बहुशो जननीं मम ।
वृद्धं स्वपितरं बद्ध्वा हतोऽयं मृत्युना स्वयम् ॥ २७ ॥

दुर्योधनः — सर्वथा वञ्चितस्त्वया कंसः । अलमात्मस्तवेन । न शौर्यमेतत् । पश्य,

†जामातृनाशव्यसनाभितप्ते
रोषाभिभूते मगधेश्वरेऽथ ।

---

† जामाता कस. ।

पलायमानस्य भयातुरस्य
शौर्यं तदेतत् क्व गतं तवासीत् ॥ २८ ॥

वासुदेवः — भोः सुयोधन ! देशकालावस्थापेक्षितं खलु शौर्यं नयानुगामिनाम् । इह तिष्ठतु तावदस्मद्गतः परिहासः । स्वकार्यमनुष्ठीयताम् ।

कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतराः ।
सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि ॥ २९ ॥

दुर्योधनः —

देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत् ।
पिष्टपेषणमेतावत् पर्याप्तं छिद्यतां कथा ॥ ३० ॥

वासुदेवः — (आत्मगतम्)

प्रसाद्यमानः साम्नायं न स्वभावं विमुञ्चति ।
हन्त संक्षोभयाम्येनं वचोभिः परुषाक्षरैः ॥ ३१ ॥

(प्रकाशम्) भोः सुयोधन ! किं न जानीषेऽर्जुनस्य बलपराक्रमम् ।

दुर्योधनः — न जाने ।

वासुदेवः — भोः ! श्रूयतां,

कैरातं वपुरास्थितः पशुपतिर्युद्धेन सन्तोषितो
वह्नेः खाण्डवमश्नतः सुमहती वृष्टिः शरैश्छादिता ।

देवेन्द्रार्तिकरा निवातकवचा नीताः क्षयं लीलया
नन्वेकेन तदा विराटनगरे भीष्मादयो निर्जिताः ॥३२॥

अपिच, तवापि प्रत्यक्षमपरं कथयामि ।

ननु त्वं चित्रसेनेन नीयमानो नभस्तलम् ।
विक्रोशन् घोषयात्रायां फल्गुनेनैव मोक्षितः ॥ ३३ ॥

किं बहुना,

दातुमर्हसि मद्वाक्याद् राज्यार्धं धृतराष्ट्रज ! ।
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः ॥ ३४ ॥

दुर्योधनः—कथं कथम् । हरिष्यन्ति हि पाण्डवाः ।

प्रहरति यदि युद्धे मारुतो भीमरूपी
प्रहरति यदि साक्षात् पार्थरूपेण शक्रः ।
परुषवचनदक्ष ! त्वद्वचोभिर्न दास्ये
तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये ॥ ३५ ॥

वासुदेवः—भोः कुरुकुलकलङ्कभूत ! अयशोलुब्ध ! वयं किल तृणान्तराभिभाषकाः ।

दुर्योधनः—भो गोपालक ! तृणान्तराभिभाष्यो भवान् ।

अवध्यां प्रमदां हत्वा हयं गोवृषमेव च ।
मल्लानपि सुनिर्लज्जो वक्तुमिच्छसि साधुभिः ॥ ३६ ।

वासुदेवः—भोः सुयोधन ! ननु क्षिपसि माम् ।

दुर्योधनः — आः अभाष्यस्त्वम् ।

अहमवधृतपाण्डरातपत्रो
द्विजवरहस्तधृताम्बुसिक्तमूर्धा ।
अवनतनृपमण्डलानुयात्रैः
सह कथयामि भवद्विधैर्न भाषे ॥ ३७ ॥

वासुदेवः — न व्याहरति किल मां सुयोधनः । भोः !

शठ ! बान्धवनिःस्नेह ! ‡काक ! केकर ! पिङ्गल ! ।
त्वदर्थात् कुरुवंशोऽयमचिरान्नाशमेष्यति ॥ ३८ ॥

भो भो राजानः ! गच्छामस्तावत् ।

दुर्योधनः — कथं यास्यति किल केशवः । दुःशासन ! दुर्मर्षण ! दुर्मुख ! दुर्बुद्धे ! दुष्टेश्वर ! दूतसमुदाचारमतिक्रान्तः केशवो बध्यताम् । कथमशक्ताः । दुःशासन ! न समर्थः खल्वसि ।

करितुरगनिहन्ता कंसहन्ता स कृष्णः
पशुपकुलनिवासादानुजीव्यानभिज्ञः ।
हृतभुजबलवीर्यः पार्थिवानां समक्षं
स्ववचनकृतदोषो बध्यतामेष शीघ्रम् ॥ ३९ ॥

अयमशक्तः । मातुल ! बध्यतामयं केशवः । कथं पराङ्मुखः

---

‡ काक ! इति दुश्चापलात्, केकर ! इति विकृताक्षत्वात्, पिङ्गल ! इति मार्जारवृत्तित्वाद् वानरवृत्तित्वाद्वा क्षेपपराणि संबोधनानि ।

पतति। भवतु, अहमेव पाशैर्बध्नामि। (उपसर्पति)

वासुदेवः— कथं (वि?बन्धु)कामो मां किल सुयोधनः।
भवतु, सुयोधनस्य सामर्थ्यं पश्यामि। (विश्वरूपमास्थितः)

दुर्योधनः— भो दूत!

सृजसि यदि समन्ताद् देवमायाः स्वमायाः
प्रहरसि यदि वा त्वं दुर्निवारैः सुरास्त्रैः।
हयगजवृषभाणां पातनाज्जातदर्पो
नरपतिगणमध्ये बध्यसे त्वं मयाद्य ॥ ४० ॥

आः तिष्ठेदानीम्। कथं न दृष्टः केशवः। अयं केशवः। अहो ह्रस्वत्वं केशवस्य। आः तिष्ठेदानीम्। कथं न दृष्टः केशवः। अयं केशवः। अहो दीर्घत्वं केशवस्य। कथं न दृष्टः केशवः। अयं केशवः। सर्वत्र मन्त्रशालायां केशवा भवन्ति। किमिदानीं करिष्ये। भवतु, दृष्टम्। भो भो राजानः! एकैकः केशवो बध्यताम्। कथं स्वयमेव पाशैर्बद्धाः पतन्ति राजानः। साधु भो [†]जम्भक! साधु।

मत्कार्मुकोदरविनिःसृतबाणजालै-
र्विच्छेदरक्षतजरञ्जितसर्वगात्रम्।

---

† जम्भको मायावी।

पश्यन्तु पाण्डुतनयाः शिबिरोपनीतं
त्वां बाष्परुद्धनयनाः परिनिःश्वसन्तः ॥ ४१ ॥

(निष्क्रान्तः)

वासुदेवः — भवतु, पाण्डवानां कार्यमहमेव साधयामि । भोः सुदर्शन ! इतस्तावत् ।

(ततः प्रविशति सुदर्शनः)

सुदर्शनः — एष भोः !

श्रुत्वा गिरं भगवतो विपुलप्रसादा-
न्निर्धावितोऽस्मि परिवारिततोयदौघः ।
कस्मिन् खलु प्रकुपितः कमलायताक्षः
कस्याद्य मूर्धनि मया प्रविजृम्भितव्यम् ॥ ४२ ॥

कनुखलु भगवान् नारायणः ।

अव्यक्तादिरचिन्त्यात्मा लोकसंरक्षणोद्यतः ।
एकोऽनेकवपुः श्रीमान् द्विषद्बलनिषूदनः ॥ ४३ ॥

(विलोक्य) अये अयं भगवान् हस्तिनपुरद्वारे दूतसमुदाचारेणोपस्थितः । कुतः खल्वापः कुतः खल्वापः । भगवति ! आकाशगङ्गे ! आपस्तावत् । हन्त स्रवति । (आचम्योपसृत्य) जयतु भगवान् नारायणः । (प्रणमति)

वासुदेवः — सुदर्शन ! अप्रतिहतपराक्रमो भव ।

सुदर्शनः — अनुगृहीतोऽस्मि ।

वासुदेवः—दिष्ट्या भवान् कर्मकाले प्राप्तः ।

सुदर्शनः—कथं कथं कर्मकाल इति । आज्ञापयतु भगवानाज्ञापयतु ।

किं मेरुमन्दरकुलं परिवर्तयामि
संक्षोभयामि सकलं मकरालयं वा ।
नक्षत्रवंशमखिलं भुवि पातयामि
नाशक्यमस्ति मम देव! तव प्रसादात् ॥ ४४ ॥

वासुदेवः—भोः सुदर्शन! इतस्तावत् । भोः सुयोधन!

यदि लवणजलं वा कन्दरं वा गिरीणां
ग्रहगणचरितं वा वायुमार्गं प्रयासि ।
मम भुजबलयोगप्राप्तसंजातवेगं
भवतु चपल! चक्रं कालचक्रं तवाद्य ॥ ४५ ॥

सुदर्शनः—भोः सुयोधनहतक! (इति पुनर्विचार्य) प्रसीदतु प्रसीदतु भगवान् नारायणः ।

महीभारापनयनं कर्तुं जातस्य भूतले ।
अस्मिन्नेवं गते देव! ननु स्याद् विफलः श्रमः ॥ ४६ ॥

वासुदेवः—सुदर्शन! रोषात् समुदाचारो नावेक्षितः । गम्यतां स्वनिलयमेव ।

सुदर्शनः—यदाज्ञापयति भगवान् नारायणः । कथं कथं गोपालक इति । त्रिचरणातिक्रान्तत्रिलोको नारायणः खल्वत्र-

भवान् । शरणं व्रजन्तु भवन्तः । यावद् गच्छामि । अये एतद् भगवदायुधवरं शार्ङ्गं प्राप्तम् ।

तनुमृदुललिताङ्गं स्त्रीस्वभावोपपन्नं
हरिकरधृतमध्यं शत्रुसङ्घैककालः ।
कनकखचितपृष्ठं भाति कृष्णस्य पार्श्वे
नवसलिलदपार्श्वे चारुविद्युल्लतेव ॥ ४७ ॥

भो भोः! प्रशान्तरोषो भगवान् नारायणः । गम्यतां स्वनिलयमेव । हन्त निवृत्तः । यावद् गच्छामि । अये इयं कौमोदकी प्राप्ता ।

मणिकनकविचित्रा चित्रमालोत्तरीया
सुररिपुगणगात्रध्वंसने जाततृष्णा ।
गिरिवरतटरूपा दुर्निवारातिवीर्या
व्रजति नभसि शीघ्रं मेघवृन्दानुयात्रा ॥ ४८ ॥

हे कौमादकि! प्रशान्तरोषो भगवान् नारायणः । हन्त निवृत्ता। यावद् गच्छामि । अये अयं पाञ्चजन्यः प्राप्तः ।

पूर्णेन्दुकुन्दकुमुदोदरहारगौरो
नारायणाननसरोजकृतप्रसादः ।
यस्य स्वनं प्रलयसागरघोषतुल्यं
गर्भा निशम्य निपतन्त्यसुराङ्गनानाम् ॥ ४९ ॥

हे पाञ्चजन्य! प्रशान्तरोषो भगवान् । गम्यताम् । हन्त निवृत्तः । अये नन्दकासिः प्राप्तः ।

वनितावित्रहो युद्धे महासुरभयङ्करः ।
प्रयाति गगने शीघ्रं महोल्केव विभात्ययम् ॥ ५० ॥

हे नन्दक! प्रशान्तरोषो भगवान्। गम्यताम् । हन्त निवृत्तः । यावद् गच्छामि । अये एतानि भगवदायुधवराणि ।

सोऽयं खड्गः खरांशोरपहसिततनुः स्वैः करैर्नन्दकाख्यः
सेयं कौमोदकी या सुररिपुकठिनोरःस्थलक्षोददक्षा ।
सैषा शार्ङ्गाभिधाना प्रलयघनरवज्यारवा चाप(रेखा
सोऽयं गम्भी)रघोषः शशिकरविशदः शङ्खराट् पाञ्चजन्यः ॥

हे शार्ङ्ग! कौमोदकि! पाञ्चजन्य!
दैत्यान्तकृन्नन्दक! शत्रुवह्ने!।
प्रशान्तरोषो भगवान् मुरारिः
स्वस्थानमेवात्र हि (गच्छ ता)वत् ॥ ५२ ॥

हन्त निवृत्ताः । यावद् गच्छामि । अये अत्युद्भूतो वायुः । अतितपत्यादित्यः । चलिताः पर्वताः । क्षुब्धाः सागराः । पतिता वृक्षाः । भ्रान्ता मेघाः । प्रलीना वासुकिप्रभृतयो भुजङ्गेश्वराः । किन्नु खल्विदम् । अये अयं भगवतो वाहनो गरुडः प्राप्तः ।

सुरासुराणां परिखेदलब्धं
येनामृतं मातृविमोक्षणार्थम् ।
आच्छिन्नमासीद् द्विषतो मुरारे-
स्त्वामुद्वहामीति वरोऽपि दत्तः ॥ ५३ ॥

हे काश्यपप्रियसुत! गरुड! प्रशान्तरोषो भगवान् देवदेवेशः। गम्यतां स्वनिलयमेव। हन्त निवृत्तः। यावद् गच्छामि।

एते + + + + + + + + + +
+ + + संभ्रमचलन्मकुटोत्तमाङ्गाः।
रुष्टेऽच्युते विगतकान्तिगुणाः प्रशान्तं
श्रुत्वा श्रयन्ति सदनानि (नि)वृत्ततापाः ॥ ५४ ॥

यावदहमपि कान्तां मेरुगुहामेव यास्यामि। (निष्क्रान्त)

वासुदेवः — यावदहमपि पाण्डवशिबिरमेव यास्यामि।

(नेपथ्ये)

नखलु नखलु गन्तव्यम्।

वासुदेवः — अये वृद्धराजस्वर इव। भो राजन्! एष स्थितोऽस्मि।

(ततः प्रविशति धृतराष्ट्रः)

धृतराष्ट्रः — कनुखलु भगवान् नारायणः। कनुखलु भगवान् पाण्डवश्रेयस्करः। कनुखलु भगवान् विप्रप्रियः। कनुखलु भगवान् देवकीनन्दनः।

मम पुत्रापराधात् तु शार्ङ्गपाणे! तवाधुना।
एतन्मे त्रिदशाध्यक्ष! पादयोः पतितं शिरः ॥ ५५ ॥

(पतति)

वासुदेवः — हा धिक्। पतितोऽत्रभवान्। उत्तिष्ठोत्तिष्ठ।

धृतराष्ट्रः — अनुगृहीतोऽस्मि । भगवन् ! इदमर्घ्यं पाद्यं च प्रतिगृह्यताम् ।

वासुदेवः — सर्वं गृह्णामि । किं ते भूयः प्रियमुपहरामि ।

धृतराष्ट्रः — यदि मे भगवान् प्रसन्नः, किमतःपरमिच्छामि ।

वासुदेवः — गच्छतु भवान् पुनर्दर्शनाय ।

धृतराष्ट्रः — यदाज्ञापयति भगवान् नारायणः । (निष्क्रान्तः)

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ ५६ ॥

(निष्क्रान्ताः सर्वे)

दूतवाक्यं समाप्तम् ।

शुभं भूयात् ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

दूतघटोत्कचम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

नारायणस्त्रिभुवनैकपरायणो वः
पायादुपायगतयुक्तिकरः सुराणाम् ।
लोकत्रयाविरतनाटकतन्त्रवस्तु-
प्रस्तावनप्रतिसमापनसूत्रधारः ॥ १ ॥

आर्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञाप-
नीये शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

भो! निवेद्यतां निवेद्यतां तावत् ।

सूत्रधारः—भवतु, विज्ञातम् । एष खलु संशप्तकानीकनि-
र्जिते जनार्दनसहाये धनञ्जये तदनन्तरमुपगतभीष्मवधामर्षि-
तैराष्ट्रैः परिवार्य निहतः कुमारोऽभिमन्युः । तथाहि,

यान्त्यर्जुनप्रत्यभियानभीता
यतोऽर्जुनस्तां दिशमीक्षमाणाः ।
नराधिपाः स्वानि निवेशनानि
सौभद्रबाणाङ्कितनष्टसंज्ञाः ॥ २ ॥

(निष्क्रान्तः)

स्थापना ।

(ततः प्रविशति भटः)

भटः—निवेद्यतां निवेद्यतां पुत्रशतश्लाघ्यबान्धवाय विज्ञा-नविस्तारितविनयाचारदीर्घचक्षुषे महाराजाय धृतराष्ट्राय । एष खलु,

यौधस्यन्दनवाजिवारणवधैर्विक्षोभ्य राज्ञां बलं
बालेनार्जुनक(भ?र्म) येन समरे लीलायता‡ दर्शितम् ।
सौभद्रः स रणे नराधिपशतैर्वेगागतैः (सर्विश्व-
खेशतस्व?*) पितामहस्य सहसैवोत्सङ्गमारोपितः ॥ ३ ॥

इति ।

(ततः प्रविशति धृतराष्ट्रो गान्धारी दुःशला प्रतिहारी च)

धृतराष्ट्रः—कथं कथं भोः!

---

‡ लीलाशब्दो लोहितादिगणे कण्ड्वादिगणे वा द्रष्टव्यः । * घनूरेखान्तर्गत 'सर्वतः खे यातस्य' इति पठनीयं भाति ।

केनैतच्छ्रुतिपथदूषणं कृतं मे
कोऽयं मे प्रियमिति विप्रियं ब्रवीति ।
कोऽस्माकं शिशुवधपातकाङ्कितानां
वंशस्य क्षयमवघोषयत्यभीतः ॥ ४ ॥

गान्धारी — (क) महाराअ! अत्थि पुण, जाणीअदि केवळं पुत्तसंखअकारओ कुळविग्गहो भविस्सदि त्ति ।

धृतराष्ट्रः — गान्धारि! ज्ञायते ।

गान्धारी — (ख) महाराअ! कदाणुखु ।

धृतराष्ट्रः — गान्धारि! शृणु ।

अद्याभिमन्युनिधनाज्जनितप्रकोपः
सामर्षकृष्णधृतरश्मिगुणप्रतोदः ।
पार्थः करिष्यति तदुग्रधनुस्सहायः
शान्तिं गमिष्यति विनाशमवाप्य लोकः ॥ ५ ॥

गान्धारी — (ग) हा अभिमञ्ञो! ईदिसे वि णाम (उ)त्तम-पुरुसक्खअकारए कुळविग्गहे वत्तमाणे बाळभावणिमज्जअं

(क) महाराज! अस्ति पुनः, ज्ञायते केवलं पुत्रसंक्षयकारकः कुलविग्रहो भविष्यतीति ।

(ख) महाराज! कदानुखलु ।

(ग) हा अभिमन्यो! ईदृशेऽपि नामोत्तमपुरुषक्षयकारके कुलविग्रहे वर्तमाने

अम्माणं *भ(ळ?)गगकमेण करअन्तो कहिं दाणि पोत्तअ! गदो सि ।

दुःशला — (क) जेण दाणि वहूए उत्तराए वेधव्वं दाइदं, तेण अत्तणो जुवदिजणस्स वेधव्वमादिट्ठं ।

धृतराष्ट्रः — अथ केनैष व्यसनार्णवस्य सेतुर्बद्धः ।

भटः — महाराज! मया ।

धृतराष्ट्रः — को भवान् ।

भटः — महाराज! ननु जयत्रातोऽस्मि ।

धृतराष्ट्रः — जयत्रात!

केनाभिमन्युर्निहतः कस्य जीवितमप्रियम् ।
पञ्चानां पाण्डवाग्नीनामात्मा येनेन्धनीकृतः ॥ ६ ॥

भटः — महाराज! बहुभिः खलु पार्थिवैः सह समागतैर्निहतः कुमारोऽभिमन्युः । स्यात् तु जयद्रथो निमित्तभूतः ।

धृतराष्ट्रः — किं किं जयद्रथो निमित्तभूतः ।

बालभावनिमज्जनमस्माकं भाग्यक्रमेण कुर्वन् कुत्रेदानीं पौत्रक! गतोऽसि ।

(क) येनेदानीं वध्वै उत्तरायै वैधव्यं दत्तं, तेनात्मनो युवतिजनाय वैधव्यमादिष्टम् ।

---

* दुर्भगत्वक्रमेणेत्यर्थः । दुरशब्दो वा भकारात् प्राक् पाठ्यः ।

भटः—महाराज! अथकिम्।

धृतराष्ट्रः—हन्त जयद्रथो निहतः।

(तच्छ्रुत्वा दुःशला रोदिति)

धृतराष्ट्रः—कैषा रोदिति।

प्रतिहारी—(क) महाराअ! भट्टिदारिआ दुस्सळा।

धृतराष्ट्रः—वत्से! अलमलं रुदितेन। पश्य,

भर्तुस्ते नूनमत्यन्तमवैधव्यं न रोचते।
येन गाण्डीविबाणानामात्मा लक्षीकृतः स्वयम् ॥ ७ ॥

दुःशला—(ख) तेण हि अणुजाणादु मं तादो, अहं पि गमिस्सं वहूए उत्तराए सआसं।

धृतराष्ट्रः—वत्से! किमभिधास्यसि।

दुःशला—(ग) ताद! एवञ्च भणिस्सं—अज्ज काळिअं च दे वेसग्गहणं अहं वि उवधारइस्सामि त्ति।

(क) महाराज! भर्तृदारिका दुःशला।

(ख) तेन ह्यनुजानातु मां तातः, अहमपि गमिष्यामि वध्वा उत्तरायाः सकाशम्।

(ग) तात! एवञ्च भणिष्यामि—अद्य कालिकं च ते वेषग्रहणमहमप्युपधारयिष्यामीति।

गान्धारी — (क) पुत्तिए ! माखु माखु अमङ्गळं भणाहि । जीवदि खु दे भत्ता ।

दुःशला — (ख) अम्ब ! कुदो मे एत्तिआणि भाअधेआणि । (जो?)जणद्दणसहाअस्स धणञ्जअस्स विप्पिअं करिअ को हि णाम जीविस्सिदि ।

धृतराष्ट्रः — सत्यमाह (तिचस्थिनी?*) दुःशला । कुतः,

कृष्णस्याष्टभुजोपधानरचिते योऽङ्के विवृद्धश्चिरं
यो मत्तस्य हलायुधस्य भवति प्रीत्या द्वितीयो मदः ।
पार्थानां सुरतुल्यविक्रमवतां स्नेहस्य यो भाजनं
तं हत्वा क इहोपलप्स्यति§ चिरं स्वैर्दुष्कृतैर्जीवितम् ॥८॥

जयत्रात ! अथ तदवस्थं पुत्रं दृष्ट्वा किं प्रतिपन्नं तेन गाण्डीवधन्वना ।

भटः — महाराज ! किं वार्जुनसमीपे वृत्तमेतत् ।

धृतराष्ट्रः — कथमर्जुनोऽपि नात्रासीत् ।

(क) पुत्रिके ! मास्वलु माखल्वमङ्गलं भण । जीवति खलु ते भर्ता ।

(ख) अम्ब ! कुतो मे एतावन्ति भागधेयानि । जनार्दनसहायस्य धनञ्जयस्य विप्रियं कृत्वा को हि नाम जीविष्यति ।

---

* 'तपस्विनी' इति पाठ्यम् । § इदात्मनेपदानित्यत्वं बोध्यम् ।

भटः — महाराज ! अथकिम् ।

धृतराष्ट्रः — कथमिदानीं वृत्तमेतत् ।

भटः — महाराज ! श्रूयतां — संशप्तकानीकनिवाहिते जनार्दनसहाये धनञ्जये स बालभावादद्दष्टदोषः सङ्ग्राममवतीर्णः कुमारोऽभिमन्युः ।

धृतराष्ट्रः — हन्त ! युक्तरूपोऽस्य वधः । को हि समर्थः सन्निहितशार्दूलां गुहां धर्षयितुम् । अथ शेषाः पाण्डवाः किमनुतिष्ठन्ति ।

भटः — महाराज ! श्रूयतां,

चितां न तावत् स्वयमस्य देह-
मारोपयन्त्यर्जुनदर्शनार्थम् ।
तेषां च नामान्युपधारयन्ति
यैस्तस्य गात्रे प्रहृतं नरेन्द्रैः ॥ ९ ॥

धृतराष्ट्रः — गान्धारि ! तदागम्यताम् । गङ्गाकूलमेव यास्यावः ।

गान्धारी — (क) महाराअ ! णं तहिं गाहामो ।

धृतराष्ट्रः — गान्धारि ! शृणु ,

(क) महाराज! ननु तत्र गाहावहे ।

अद्यैव दास्यामि जलं हतेभ्यः
स्वेनापराधेन तवात्मजेभ्यः ।
न त्वस्मि शक्तः सलिलप्रदानैः
कर्तुं नृपाणां शिबिरोपरोधम् ॥ १० ॥

(ततः प्रविशति दुर्योधनो दुःशासनः शकुनिश्च)

दुर्योधनः — वत्स! दुःशासन!

यातोऽभिमन्युनिधनात् स्थिरतां विरोधः
प्राप्तो जयः प्रचलिता रिपवो निरस्ताः ।
उन्मूलितोऽस्य च मदो मधुसूदनस्य
लब्धो मयाद्य सममभ्युदयेन शब्दः ॥ ११ ॥

दुःशासनः — अहेतुखलु,

रुद्धाः पाण्डुसुता जयद्रथबलेनाक्रम्य शत्रोर्बलं
सौभद्रे विनिपातिते शरशतक्षेपैर्द्वितीयेऽर्जुने ।
प्राप्तैश्च व्यसनानि भीष्मपतनादस्माभिरस्याहवे
तीव्राः शोकशराः कृताः खलु मनस्येषां सुतोत्सादनात् ॥ १२ ॥

शकुनिः —

जयद्रथेनाद्य महत् कृतं रणे
नृपैरसम्भावितमात्मपौरुषम् ।
प्रसह्य तेषां यदनेन संयुगे
समं सुतेनाप्रतिमं हृतं यशः ॥ १३ ॥

दुर्योधनः — मातुल !

शकुनिः — वत्स ! किम् ।

दुर्योधनः — मातुल ! इतस्तावत् । वत्स ! दुःशासन ! इतस्तावत् । तत्रभवन्तं तातमभिवादयिष्यामः ।

शकुनिः — वत्स ! दुर्योधन ! मामैवम् ।

कामं न तस्य रुचितः कुलविग्रहोऽय-
मस्मांश्च गर्हयति स प्रियपाण्डवत्वात् ।
युद्धोत्थितैर्जयमवाप्य हि तुल्यरूपम्*
एवं प्रहृष्टवदनैरभिगन्तुमेनम् ॥ १४ ॥

दुर्योधनः — मातुल ! मामैवम् । यथा तथा भवतु, तत्रभवन्तं तातमभिवादयिष्यामः (परिक्रामति)

दुर्योधनः — तात ! दुर्योधनोऽहमभिवादये ।

दुःशासनः — तात ! दुःशासनोऽहमभिवादये ।

शकुनिः — शकुनिरहमभिवादये ।

सर्वे — कथमाशीर्वचनं न प्रयुज्यते ।

धृतराष्ट्रः — पुत्र ! कथमाशीर्वचनमिति ।

सौभद्रे निहते बाले हृदये कृष्णपार्थयोः ।
जीविते निरपेक्षाणां कथमाशीः प्रयुज्यते ॥ १५ ॥

---

* तुल्यरूप युक्तरूपमित्यर्थः ।

दुर्योधनः— तात ! किंकृतोऽयं सम्भ्रमः ।

धृतराष्ट्रः— किंकृतोऽयं सम्भ्रम इति ।

एका कुलेऽस्मिन् बहुपुत्रनाथे
लब्धा सुता पुत्रशताद् विशिष्टा ।
सा बान्धवानां भवतां प्रसादाद्
वैधव्यमश्लाघ्यमवाप्स्यतीति ॥ १६ ॥

दुर्योधनः— किं चात्र जयद्रथस्य ।

धृतराष्ट्रः— तेन किल वरविदग्धेन रुद्धाः पाण्डवाः ।

दुर्योधनः— आ तेन रुद्धाः, बहुभिः खल्वन्यैः ।

धृतराष्ट्रः— भोः कष्टम् ।

बहूनां समुपेतानामेकस्मिन्निर्घृणात्मनाम् ।
बाले पुत्रे प्रहरतां कथं न पतिता भुजाः ॥ १७ ॥

दुर्योधनः— तात !

वृद्धं भीष्मं छलैर्हत्वा कथं न पतिता भुजाः ।
हत्वास्माकं पतिष्यन्ति तमबालपराक्रमम् ॥ १८ ॥

धृतराष्ट्रः— पुत्र ! किं भीष्मस्य निपातनमभिमन्योश्च वधः समः* ।

---

* ममेति स्यात् ।

दुर्योधनः — तात! कथं न समः।

धृतराष्ट्रः — पुत्र! श्रूयताम्,

स्वच्छन्दमृत्युर्निहतो हि भीष्मः
स्वेनोपदेशेन कृतात्मतुष्टः‡ ।
अयं तु बालः कुरुवंशनाथ-
श्छिन्नोऽर्जुनस्य प्रथमः प्रवालः ॥ १९ ॥

दुःशासनः — तात! बालो न बाल इति। अभिमन्युना,

धृतराष्ट्रः — किं किं दुःशासनो व्याहरति।

दुःशासनः — अथकिम् ।

सर्वेषां नः पश्यतां युध्यतां च
†व्या(च्चा?धा)मोष्मं *गृह्य चापं करेण ।
सूर्येणेवाभ्यागतैरंशुजालैः
सर्वे बाणैरङ्किता भूमिपालाः ॥ २० ॥

---

‡ कृतार्थतुष्ट इत्यर्थः । तथैव वा पाठो भवेत् ।

† व्याधामोष्म दम्भोलितिवपम् । 'व्याधाम पुंसि दम्भोलि.' इति वैजयन्ती, ऊष्मो घर्मेऽश्रुणि तथा ज्येष्ठ ऊष्मा स्त्रिया त्विपि' इति चोपालितश्च ।

* 'क्त्वापिच्छन्दसि' (७-१-३८) इति सूत्रे अपिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वाद् भाषायामसमासे क्त्वो ल्यबि'ति 'स्वधन त्यज्य गच्छति' इति प्रयोगगतो ल्यप् साधितो दुर्घटवृत्तौ 'समासेऽनञ्पूर्वे' (७ १-३७) इति सूत्रे । सैव गतिरिहाश्रयणीया । अथवा 'व्याधामोष्म' इत्यनुस्वारो दीर्घलिपिस्थाने लेखकेन भ्रमाद् लिखित इति कल्प्यम् । तथा च 'व्याधामोष्मागृह्य' इति पाठ. स्यात् । व्याधामस्येवोष्मा यस्य तद् व्याधामोष्म दम्भोलिशक्तिकमित्यर्थः । चापविशेषणमिद नकारान्तोत्तरपदकम् । चापशब्दश्चेह नपुसकलिङ्ग आश्रयणीय 'अस्त्रियौ चापधनुषी'ति वैजयन्त्युक्ते । एवञ्च 'आगृह्य' इति ल्यबन्तं लप्स्यते । 'अयमागृहीतकर्मनीयकङ्कण.' इतिवच्चात्राङ्पूर्वो ग्रहिः सम्यगग्रहणे वर्तिष्यते ।

धृतराष्ट्रः — कष्टं भोः !

बालेनैकेन तावद् भोः ! सौभद्रेणेदृशं कृतम् ।
पुत्रव्यसनसन्तप्तः पार्थो वः किं करिष्यति ॥ २१ ॥

दुर्योधनः — किं करिष्यति ।

धृतराष्ट्रः — तत् करिष्यति, यत् सावशेषायुषो द्रक्ष्यथ ।

दुर्योधनः — तात ! कस्तावदर्जुनो नाम ।

धृतराष्ट्रः — पुत्र ! अर्जुनमपि न जानीषे ।

दुर्योधनः — न जाने ।

धृतराष्ट्रः — तेन हि, अहमपि न जाने । किन्तु, अर्जुनस्य बलवीर्यज्ञा बहवः सन्ति । तान् पृच्छ ।

दुर्योधनः — तात ! केऽर्जुनस्य बलवीर्यज्ञा मया प्रष्टव्याः ।

धृतराष्ट्रः — पुत्र ! श्रूयतां,

शक्रं पृच्छ पुरा निवातकवचप्राणोपहारार्चितं
पृच्छास्त्रैः परितोषितं बहुविधैः कैरातरूपं हरम् ।
पृच्छाग्निं भुजगाहुतिप्रणयिनं यस्तर्पितः खाण्डवे
[1]विद्यारक्षितमद्य येन च जितस्त्वं पृच्छ चित्राङ्गदम् ॥२२॥

दुर्योधनः — यद्येतद् वीर्यमर्जुनस्य, किमस्माकं बले न सन्ति प्रतियोद्धारोऽर्जुनस्य ।

---

[1] विद्यारक्षितं विद्याधरम् ।

धृतराष्ट्रः — पुत्र! यदि, के ।

दुर्योधनः — ननु कर्ण एव तावत् ।

धृतराष्ट्रः — अहो हास्यः खलु तपस्वी कर्णः ।

दुर्योधनः — केन कारणेन ।

धृतराष्ट्रः — श्रूयतां,

शक्रापनीतकवचोऽर्धरथः प्रमादी
व्याजोपलब्धविफलास्त्रबलो घृणावान् ।
कर्णोऽर्जुनस्य किल(चा? या)स्यति तुल्यभावं
यद्यस्त्रदानगुरवो दहनेन्द्ररुद्राः ॥ २३ ॥

शकुनिः — प्रभवति भवानस्मानवधीरयितुम् ।

धृतराष्ट्रः — शकुनिरेष व्याहरति । भोः शकुने!

त्वया हि यत् कृतं कर्म सततं द्यूतशालिना ।
तत् कुलस्यास्य वैराग्निर्बालेष्वपि न शाम्यति ॥ २४ ॥

दुर्योधनः — अये,

भूमिकम्पः सशब्दोऽयं कुतोनु सहसोत्थितः ।
उल्काभिश्च पतन्तीभिः प्रज्वालितमिवाम्बरम् ॥ २५ ॥

धृतराष्ट्रः — पुत्र! एवं मन्ये,

सुव्यक्तं निहतं दृष्ट्वा पौत्रमायस्तचेतसः ।
उल्कारूपाः पतन्त्येते महेन्द्रस्याश्रुबिन्दवः ॥ २६ ॥

दुर्योधनः— जयव्रात! गच्छ, पाण्डवशिबिरे शङ्खपटह-सिंहनादरवोन्मिश्रः किंकृतोऽयं शब्द इति ज्ञायताम् ।

भटः— यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) संशप्तकानीकनिर्वाहितप्रतिनिवृत्तेन धनञ्जयेन निहतं पुत्रमङ्कस्थमश्रुभिः परिपिच्य जनार्दनावभर्त्सितेन प्रतिज्ञातं किलानेन ।

दुर्योधनः— किमिति किमिति ।

भटः—

तस्यैव व्यवसायतुष्टहृदयैस्तद्विक्रमोत्साहिभि-
स्तुष्टास्यैर्जितमित्यवेक्ष्य सहसा नादः प्रकर्षात् कृतः ।
आक्रान्ता गुरुभिर्धराधरवरैः संक्षेपितैः पार्थिवै-
र्भूमिश्चागतसम्भ्रमेव युवतिस्तस्मिन् क्षणे कम्पिता ॥ २७ ॥

धृतराष्ट्रः—

प्रतिज्ञा(सा?स्व)रमात्रेण कम्पितेयं वसुन्धरा ।
सुव्यक्तं धनुषि स्पृष्टे त्रैलोक्यं विचलिष्यति ॥ २८ ॥

दुर्योधनः— किमनेन प्रतिज्ञातम् ।

भटः—

येन मे निहतः पुत्रस्तुष्टिं ये च हते गताः ।
श्वः सूर्येऽस्तमनसम्प्राप्ते निहनिष्यामि तानहम् ॥ २९ ॥

इति ।

दुर्योधनः — प्रतिज्ञाव्याघाते प्रयत्नमनुतिष्ठामि ।

धृतराष्ट्रः — पुत्र ! किं करिष्यसि ।

दुर्योधनः — ननु सर्वाक्षौहिणीसन्दोहेनच्छादयिष्ये जयद्रथम् । अपिच,

द्रोणोपदेशेन यथा तथैव
संयोजये व्यूहमभेद्यरूपम् ।
खिन्नाशयास्ते सगजाः सयोधा
अग्रासकामा ज्वलनं विशेयुः ॥ ३० ॥

धृतराष्ट्रः —

अपि प्रविष्टं धरणीमप्यारूढं नभःस्थलम् ।
सर्वत्रानुगमिष्यन्ति शरास्ते कृष्णचक्षुषः ॥ ३१ ॥

भटः —

क्रूरमेवं नरपतिं नित्यमुद्यतशासनम् ।
यः कश्चिदपरो ब्रूयान्न तु जीवेत् स तत्क्षणम् ॥३२॥

(ततः प्रविशति घटोत्कचः)

घटोत्कचः — एष भोः !

प्रयामि सौभद्रविनाशचो(द)कं
दिदृक्षुरद्यारिमनार्यचेतसम् ।

विचिन्तयंश्चक्रधरस्य शासनं
यथा गजेन्द्रोऽङ्कुशशङ्कितो बलिम् ॥ ३३ ॥

(अधो विलोक्य) इदमन्योपस्थानद्वारमुखम् । यावदवतरामि
(अवतीर्य) आत्मनैवात्मानं निवेदयिष्ये ।

हैडिम्बोऽस्मि घटोत्कचो यदुपतेर्वाक्यं गृहीत्वागतो
द्रष्टव्योऽत्र मया गुरुः स्वचरितैर्दोषैर्गतः शत्रुताम् ।

दुर्योधनः—

एह्येहि प्रविश स्वशत्रुभवनं कौतूहलं मे महद्
धृष्टं श्रावय मां जनार्दनवचो दुर्योधनोऽहं स्थितः॥ ३४ ॥

घटोत्कचः—(प्रविश्य) अये अयमत्रभवान् धृतराष्ट्रः अयं ननु ललितगम्भीराकृतिविशेषः । आश्चर्यमाश्चर्यम् ।

वृद्धोऽप्यनाततवली(शुत्र?शत)संहतांसः
श्रद्धेयरूप इव पुत्रशतस्य धृत्या ।
मन्ये सुरैस्त्रिदिवरक्षणजातशङ्कै-
स्त्रासान्निमीलितमुखोऽत्रभवान् हि सृष्टः ॥३५॥

पितामह! अभिवादये घटोत्क, न न, युधिष्ठिरादयश्च मे गुरवं भवन्तमभिवादयन्ति । पश्चाद् घटोत्कचोऽहमभिवादये ।

धृतराष्ट्रः—एह्येहि [S]पुत्र!(?)

S 'हिडिम्बापुत्र! इति वा पौत्र! इति वा संबोधनमिदं स्यात् ।

न मे (प्रियादारवमिदं?)§ ममापि
यद् भ्रातृनाशाद् *व्यसितस्तवात्मा ।
इत्थं च ते नानुगतोऽयमर्थो
मत्पुत्रदोषात् कृपणीकृतोऽस्मि ॥ ३६ ॥

घटोत्कचः—अहो कल्याणः खल्वत्रभवान् । कल्याणानां प्रसूतिं पितामहमाह भगवांश्चक्रायुधः ।

धृतराष्ट्रः—(आसनादुत्थाय) किमाज्ञापयति भगवांश्चक्रायुधः।

घटोत्कचः— न न न, आसनस्थेनैव भवता श्रोतव्यो जनार्दनस्य सन्देशः ।

धृतराष्ट्रः— यदाज्ञापयति भगवांश्चक्रायुधः । (उपविशति)

घटोत्कचः—पितामह! श्रूयतां—हा वत्स! अभिमन्यो! हा वत्स! कुरुकुलप्रदीप! हा वत्स! यदुकुलप्रवाल! तव जननीभ्रातरं जनार्दनं मामपि परित्यज्य पितामहं द्रष्टुमाशया स्वर्गमभिगतोऽसि । पितामह! एकपुत्रविनाशादर्जुनस्य तावदीदृशी खल्ववस्था, का पुनर्भवतो भविष्यति । ततः क्षिप्रमिदानीमात्मबलाधानं कुरुष्व, यथा ते पुत्रशोकसमुत्थितोऽग्निर्न दहेत् प्राणमयं हविरिति ।

धृतराष्ट्रः—

सक्रोधव्यवसायेन कृष्णेनैतदुदाहृतम् ।
पश्यामीव हि गाण्डीवी सर्वक्षत्रवधे धृतः ॥ ३७ ॥

---

§ धनूरेखान्तर्गत 'प्रियाख्यानमिदम्' इति वा 'प्रिय वाक्यमिदम्' इति वा पाठ्य भाति ।

* व्यसितः दुःखित. । तवेति भ्रातरि संबन्धनीयम् ।

दुर्योधनः— अहो हास्यमभिधानम् ।

घटोत्कचः— किमेतद्धास्यते ।

दुर्योधनः— एतद्धास्यते ।

देवैर्मन्त्रयते सार्धं स कृष्णो जातमत्सरः ।
पार्थेनैकेन यो वेत्ति निहतं राजमण्डलम् ॥ ३८ ॥

घटोत्कचः—

हसासि त्वमहं वक्ता प्रेषितश्चक्रपाणिना ।
श्रावितं पार्थकर्मेदमहो युक्तं तवैव तु ॥ ३९ ॥

अपिच, भवतापि श्रोतव्यो जनार्दनस्य सन्देशः ।

दुःशासनः— मा तावद् भोः! क्षत्रियावमानिन्!

पृथिव्यां शासनं यस्य धार्यते सर्वपार्थिवैः ।
सन्देशः श्रोष्यतेऽप्यन्यो नराज्ञस्तस्य सन्निधौ ॥ ४० ॥

घटोत्कचः— कथं कथम् । अराजा नाम भवतां चक्रायुधः । हं भोः!

मुक्ता येन (*चदा पुरा ?) नृपंतयः प्रभ्रष्टमानोच्छ्रया
येना(धं?)नृपमण्डलस्य मिषतो भीष्माग्रहस्ताद् वृतम् ।

---

* अत्र 'जरापुरानृपतय' इति पठनीय भाति । जरापुर च जरासन्धनगरं स्यात् ।
† 'धं' इति पाठ्य भाति । तथा च अर्थः पत्नी रुक्मिणीत्यर्थः । भीष्मशब्दश्च भीष्मकनामधेये रुक्मिणीपितरि वर्तते ।

श्रीर्यस्याभिरता नियोगसुमुखी श्री(वृक्ष?वत्स)शय्यागृहे
श्लाघ्यः पार्थिवपार्थिवस्तव कथं राजा न चक्रायुधः ॥ ४१ ।

दुर्योधनः — दुःशासन! अलमलं विवादेन ।

राजा वा यदि वाराजा बली वा यदि वाबली ।
बहुनात्र किमुक्तेन किमाह भवतां प्रभुः ॥ ४२ ॥

घटोत्कचः — अथकिम् अथकिम् । प्रभुरेव त्रैलोक्यनाथस्तत्रभवान् नारायणः, विशेषतोऽस्माकं प्रभुः । अपिच,

अवसितमवगच्छ क्षत्रियाणां विनाशं
नृपशतविनिचि(तया?त्या)* लाघवं चास्तु भूमेः ।
न हि तनयविनाशादुद्यतोग्रास्त्रमु(ग्रे?क्ते)ः
समरशिरसि कश्चित् फल्गुनस्यातिभारः ॥ ४३ ॥

शकुनिः —

यदि स्याद् वाक्यमात्रेण निर्जितेयं वसुन्धरा ।
वाक्ये वाक्ये यदि भवेत् सर्वक्षत्रवधः कृतः ॥ ४४ ॥

घटोत्कचः — रे रे! शकुनिरेष व्याहरति । भोः शकुने
अक्षान् विमुञ्च शकुने! कुरु बाणयोग्य-
मष्टापदं समरकर्मणि युक्तरूपम् ।

---

* विनिचितिर्विनिचयः ।

न ह्यत्र दारहरणं न च राज्यतन्त्रं
प्राणाः पणोऽत्र *रतिरुग्रफलाश्च बाणाः ॥ ४५ ॥

दुःशासनः—हेहेप्रयोगतः,†

क्षिपसि वदसि रूक्षं लङ्घयित्वा प्रमाणं
न च गणयसि किञ्चिद् व्याहरन् दीर्घहस्तः ।
यदि खलु तव दर्पो मातृपक्षोग्ररूपो
वयमपि खलु रौद्रा राक्षसोग्रस्वभावाः ॥ ४६ ॥

घटोत्कचः—शान्तं शान्तं पापम् । राक्षसेभ्योऽपि भवन्त एव क्रूरतमाः । कुतः,

न तु जतुगृह सुप्तान् भ्रातॄन् दहन्ति निशाचराः
शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः ।
न च सुतवधं सङ्घ्ये वृत्तं स्मरन्ति निशाचरा
विकृतवपुषोऽ(पुत्रा?प्युग्रा)चारा घृणा न तु वर्जिता ॥ ४७ ॥

दुर्योधनः—

दूतः खलु भवान् प्राप्तो न त्वं युद्धार्थमागतः ।
गृहीत्वा गच्छ सन्देशं न वयं दूतघातकाः ॥ ४८ ॥

घटोत्कचः—किं किं दूत इति मां प्रधर्षयसि। मा तावद् भोः ! न दूतोऽहम् ।

---

* रतिः रतिहेतव इत्यर्थः । हेतुकार्ययोरभेदोपचार आयुर्घृतमितिवत् । † इदं 'रभसयोगात्' इति पाठ्यं भाति, 'रेरे' इति घटोत्कचेन प्राक्संबोधनकरणात् । 'हीनसंबोधने तु हे हन्त' इत्यमरः ।

अलं वो व्यवसायेन प्रहरध्वं समागताः ।
ज्याच्छेदाद् दुर्बलो नाहमभिमन्युरिह स्थितः ॥ ४९ ॥

महानेष कैशोरकोऽयं मे मनोरथः । अपिच,

दष्टोष्ठो मुष्टिमुद्यम्य तिष्ठत्येष घटोत्कचः ।
उत्तिष्ठतु पुमान् कश्चिद् गन्तुमि(च्छेद्?च्छन्)यमालयम् ॥ ५० ॥

धृतराष्ट्रः — पौत्र! घटोत्कच! मर्षयतु मर्षयतु भवान् । महच्चना(व)गन्ता भव ।

घटोत्कचः — न शक्नोमि रोषं धारयितुम् । तथापि पितामहवचनाद् दूत एवास्मि । किमिति विज्ञाप्यस्तत्रभवान् नारायणः ।

दुर्योधनः — आः कस्य विज्ञाप्यम् । महच्चनादेवं स वक्तव्यः,

किं व्यर्थं बहु भाषसे न खलु ते पौरु(ष?ष्य)साध्या वयं
दूरं नार्हति किञ्चिदेव वचनं युद्धं यदा दास्यति ।
निर्यास्येष निरन्तरं नृपशतच्छत्रावलीभिर्वृत-
स्तिष्ठ त्वं सह पाण्डवैः प्रतिवचो दास्यामि ते सायकैः ॥ ५१ ॥

इति ।

घटोत्कचः — पितामह! एष गच्छामि ।

धृतराष्ट्रः — पौत्र! गच्छ गच्छ

घटोत्कचः—भो भो राजानः ! श्रूयता जनार्दनस्य पश्चिमसन्देशः,

धर्मं समाचर (गु?कु)रु स्वजनव्यपेक्षां
यत् काङ्क्षितं मनसि सर्वमिहानुतिष्ठ ।
जात्योपदेश इव पाण्डवरूपधारी
सूर्यांशुभिः सममुपैष्यति वः कृतान्तः ॥ ५२ ॥

इति ।*

(निष्क्रान्ताः सर्वे)

दूतघटोत्कचमवसितम् ।

शुभं भूयात् ।

---

* इदं भरतवाक्यं न पठ्यते ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

कर्णभारम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

नरमृगपतिवर्ष्मालोकनभ्रान्तनारी-
नरदनुजसुप(र्ण?र्व)व्रातपातालल्लोकः ।
करजकुलिशपालीभिन्नदैत्येन्द्रवक्षाः
सुररिपुबलहन्ता श्रीधरोऽस्तु श्रिये वः ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

भो भो! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वराय ।

सूत्रधारः— भवतु, विज्ञातम् ।

सङ्ग्रामे तुमुले जाते कर्णाय कलिताञ्जलिः ।
निवेदयति संभ्रान्तो भृत्यो दुर्योधनाज्ञया ॥ २ ॥

(निष्क्रान्तः)

प्रस्तावना ।

(ततः प्रविशति भटः)

भटः — भो भो! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वरा[1]य — युद्धकाल उपस्थित इति ।

करितुरगरथस्थैः पार्थकेतोः पुरस्ताद्
मुदितनृपतिसिंहैः सिंहनादः कृतोऽद्य ।
त्वरितमरिनिना(द?दै)र्दुःसहं लोकवीरः
समरमधि[2]गतार्थः प्रस्थितो नागकेतुः ॥ ३ ॥

(परिक्रम्यावलोक्य) अये एषोऽङ्गराजः समरपरिच्छदपरिवृतः शल्यराजसहितः स्वभवनान्निष्क्रम्येत एवाभिवर्तते । भोः! किन्नुखल्वु युद्धोत्सवप्रमुखस्य[†] दृष्टपराक्रमस्याभूतपूर्वो हृदयपरितापः । एष हि,

अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः
शौर्यं च सम्प्रति स[5]शोकमुपैति धीमान् ।
प्राप्ते निदाघसमये घनराशिरुद्धः
सूर्यः स्वभावरुचिमानिव भाति कर्णः ॥ ४ ॥

यावदुपसर्पामि । (निष्क्रान्तः)

---

१. 'अराजाय' क पाठः. २. 'भि' क. पाठः. ३. 'विलो' क. पाठः. ४. 'संता' क पाठः. ५ 'धरिमु' क पाठः.

---

† मुखं प्रगतः प्रमुखो मुख्यः ।

(ततः प्रविशति यथोक्तरूपः[1] कर्णः शल्यश्च)

कर्णः —

मा तावन्मम शरमार्गलक्षभूताः
किं प्राप्ताः क्षितिपतयः सजीवशेषाः ।
कर्तव्यं रणशिरसि प्रियं कुरूणां
द्रष्टव्यो यदि स भवेद् धनञ्जयो मे ॥ ५ ॥

शल्यराज ! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

शल्यः — बाढम् । (चोदयति)

कर्णः — अहोतुखलु,

अन्योन्यशस्त्रविनिपातनिकृत्तगात्र-
यौधाश्ववारणरथेषु महाहवेषु ।
क्रुद्धान्तकप्रतिमविक्रमिणो ममापि
वैधुर्यमापतति चेतसि युद्धकाले ॥ ६ ॥

*भोः ! कष्टम् ।

पूर्वं कुन्त्यां समुत्पन्नो राधेय इति विश्रुतः ।
युधिष्ठिरादयस्ते मे यवीयांसस्तु[2] पाण्डवाः ॥ ७ ॥

---

१. 'थानिर्दिष्टः क' ख. पाठ.. २. 'श्च' ख. पाठ·.

---

* 'भोः' इत्यतः प्राक् 'स्वगतम्' इत्यपेक्षित भाति ।

अयं स कालः क्रमलब्धशोभनो
*गुणप्रकर्षो दिवसोऽयमागतः ।
निरर्थमस्त्रं च मया हि शिक्षितं
पुनश्च मातुर्वचनेन वारितः ॥ ८ ॥

§भो मद्रराज[1]! श्रूयतां ममास्त्रस्य वृत्तान्तः ।

शल्यः— ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।

कर्णः— पूर्वमेव चाहं जामदग्न्यस्य सकाशं गतवानस्मि ।

शल्यः— ततस्ततः ।

कर्णः— तत[2]ः,

विद्युल्लताकपिलतुङ्गजटाकलाप-
मुद्यत्प्रभावलयिनं परशुं दधानम् ।
क्षत्रान्तकं मुनिवरं भृगुवंशकेतुं
गत्वा प्रणम्य निकटे निभृतः स्थितोऽस्मि ॥ ९ ॥

शल्यः— ततस्ततः ।

कर्णः— ततस्तेन जामद(भिना?ग्न्येन) ममाशीर्वचनं दत्त्व पृष्टोऽस्मि — को भवान्, किमर्थमिहागत इति[3] ।

---

१. 'शल्यरा' ख. पाठः. २. 'तस्त भगवन्तं प्रणम्य कृताञ्जलिः स्थितोऽस्मि । तद वि' ख. पाठः. ३. 'त्वा को' ख. पाठः. ४. 'त्युक्तः ।' ख. पाठः.

---

* गुणप्रकर्षो गुणवत्तर इत्यर्थः । § इह 'प्रकाशम्' इत्यपेक्षितं भाति ।

शल्यः— ततस्ततः ।

कर्णः— भगवन् ! अखिलान्यस्त्राण्युपशिक्षितुमिच्छामीत्युक्तवानस्मि ।

शल्यः— ततस्ततः ।

कर्णः— तत उक्तोऽहं भगवता— ब्राह्मणेषूपदेशं करिष्यामि, न क्षत्रियाणामिति ।

शल्यः— अस्ति खलु भगवतः क्षत्रियवंश्यैः पूर्ववैरम् । ततस्ततः ।

कर्णः— ततो नाहं क्षत्रिय इत्यस्त्रोपदेशं ग्रहीतुमारब्धः ।

शल्यः— ततस्ततः ।

कर्णः— ततः कतिपयकालातिक्रमे[1] कदाचित् फलमूलसमित्कुशकुसुमाहरणाय[2] गतवता गुरुणा सहानुगतोऽस्मि । ततः गुरुर्वनभ्रमणपरिश्रमान्मदङ्के निद्रावशमुपगतः ।

शल्यः— ततस्ततः ।

कर्णः— ततः,

वृत्ते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात् तदा वेदना ।

---

१. 'नि' ख. पाठः. २. 'दिवसाति' ख. पाठः.

उत्थाय क्षतजोप्लुतः स सहसा रोषानलोद्दीपितो[1]
बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते सन्त्विति ॥१०॥

शल्यः—अहो कष्टमभिहितं तत्रभवता ।

कर्णः—परीक्षामहे तावदस्त्रस्य वृत्तान्तम् । (तथा कृत्वा) एतान्यस्त्राणि निर्वीर्याणीव लक्ष्यन्ते । अपिच,

इमे हि दैन्येन निमीलितेक्षणा
मुहुः स्खलन्तो विवशास्तुरङ्गमाः ।
गजाश्च सप्तच्छददानगन्धिनो
निवेदयन्तीव रणे निवर्तनम् ॥ ११ ॥

शङ्खदुन्दुभयश्च निःशब्दाः ।

शल्यः—भोः! कष्टं खल्विदम् ।

कर्णः—शल्यराज! अलमलं विषादेन ।

हतोऽपि लभते स्वर्गं जित्वा तु[2] लभते यशः ।
उभे बहुमते लोके नास्ति निष्फलता रणे ॥ १२ ॥

अपिच,

इमे हि युद्धेष्वनिवर्तिताशा
हयाः सुपर्णेन समानवेगाः ।

---

१ 'जोक्षितः' ख पाठः. २. 'पि' ख. पाठः.

श्रीमत्सु काम्बोजकुलेषु जाता
रक्षन्त्यमी यद्यपि रक्षितव्यम् ॥ १३ ॥

अक्षयोऽस्तु गोब्राह्मणानाम् । अक्षयोऽस्तु पतिव्रतानाम् । अक्षयोऽस्तु रणेष्वपराङ्मुखानां यौधपुरुषाणाम् । अक्षयोऽस्तु मम प्राप्तकालस्य। एष भोः[२], प्रसन्नोऽस्मि[†]।

समरमुखमसह्यं पाण्डवानां प्रविश्य
प्रथितगुणगणाढ्यं धर्मराजं च बद्ध्वा ।
मम शरवरवेगैरर्जुनं पातयित्वा
घनमिव हतसिंहं सुप्रवेशं करोमि ॥ १४ ॥

शल्यराज! यावद् रथमारोहावः ।

शल्यः — बाढम् ।

(उभौ रथारोहणं नाटयतः)

कर्णः — शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

(नेपथ्ये)

(क) भो कण्ण! महत्तरं भिक्खं याचेमि ।

(क) भोः कर्ण! महत्तरां भिक्षां याचे ।

---

१. 'न्तु मां य' क. पाठः. २. 'स्त्वप' क. पाठः. ३. 'भोः, स' क. पाठः.

---

† एतदनन्तरम् 'अये शब्द इव' इति, 'शङ्खध्वनिः प्रलयसागरघोषतुल्यः' इत्यादि (श्लो. २४) पद्यं चाधिकं ख. पुस्तके पठ्यते ।

कर्णः— (आकर्ण्य) अये वीर्यवान् शब्दः ।

श्रीमानेव न केवलं द्विजवरो यस्मात् प्रभावो महा-
नाकर्ण्य स्वरमस्य धीरमधुरं चित्रार्पिताङ्गा इव ।
उत्कर्णस्तिमिताञ्चिता(क्षि?क्ष)वलितग्रीवार्पिताग्रानना-
स्तिष्ठन्त्यस्ववशाङ्गयष्टि सहसा यान्तो ममैते हयाः ॥१५॥

आहूयतां स विप्रः । न न । अहमेवाह्वयामि । भगवन्! इत इतः ।

(ततः प्रविशति ब्राह्मणरूपेण शक्रः)

शक्रः— *भो मेघाः! सूर्येणैव निवर्त्य गच्छन्तु भवन्तः ।

(कर्णमुपगम्य) (क) भो कण्ण! महत्तरं भिक्खं याचेमि ।

कर्णः— दृढं प्रीतोऽस्मि भगवन्!

यातः कृतार्थगणनामहमद्य लोके
राजेन्द्रमौलिमणिरञ्जितपादपद्मः ।
विप्रेन्द्रपादरजसा तु पवित्रमौलिः
कर्णो भवन्तमहमेष नमस्करोमि ॥ १६ ॥

शक्रः— (आत्मगतम्) किन्नुखलु मया वक्तव्यम् । यदि दीर्घा-
युर्भवेति वक्ष्ये, दीर्घायुर्भविष्यति । यदि न वक्ष्ये, मूढ इति मां

(क) भोः कर्ण! महत्तरां भिक्षां याचे ।

---

* स्ववाहनभूतान् मेघानादिशति — भो इत्यादिना ।

परिभवति । तस्मादुभयं परिहृत्य किन्नुखलु वक्ष्यामि । भवतु, दृष्टम् । (प्रकाशम्) (क) भो कर्ण! सुय्ये विअ, चन्दे विअ, हिमवन्ते विअ, सागळे विअ, चिट्ठदु दे जसो ।

कर्णः—भगवन्! किं न वक्तव्यं दीर्घायुर्भवेति । अथवा एतदेव शोभनम् । कुतः,

धर्मो हि यत्नैः पुरुषेण साध्यो
भुजङ्गजिह्वाचपला नृपाश्रियः ।
तस्मात् प्रजापालनमात्रबुद्ध्या[2]
हृतेषु देहेषु गुणा *धरन्ते ॥ १७ ॥

भगवन्! किमिच्छसि, किमहं ददामि ।

शक्रः—(ख) महत्तरं भिक्खं याचेमि ।

कर्णः—महत्तरां भिक्षां भवते प्रदास्ये। श्रूयन्तां मद्विभवाः,

गुणवदमृतकल्पक्षीरधाराभिवर्षि
द्विजवर! रुचितं ते तृप्तवत्सानुपातम्[3] ।

(क) भोः कर्ण! सूर्य इव, चन्द्र इव, हिमवानिव, सागर इव, तिष्ठतु ते यशः ।

(ख) महत्तरां भिक्षां याचे ।

---

१. 'अ' ख. पाठः. २. 'मत्र बुद्ध्वा ह' ख. पाठः. ३. 'या' ख. पाठः.

---

* सन्तीत्यर्थः । प्रजापालनरूप धर्ममवेक्ष्यैव गुणवत्ता देहानां, स्वभावात्तु ते गर्हिता इति तात्पर्यम् ।

तरुणमधिकमर्थिप्रार्थनीयं पवित्रं
विहितकनकशृङ्गं गोसहस्रं ददामि ॥ १८ ॥

शक्रः—(क) गोसहस्सं त्ति । मुहुत्तअं खिरं पिबामि । णेच्छामि कण्ण! णेच्छामि ।

कर्णः—किं नेच्छति भगवान् । इदमपि श्रूयतां,

रवितुरगसमानं साधनं राजलक्ष्म्याः
सकलनृपतिमान्यं मान्यकाम्बोजजातम् ।
सुगुणमनिलवेगं युद्धदृष्टापदानं
सपदि बहुसहस्रं वाजिनां ते ददामि ॥ १९ ॥

शक्रः—(ख) अस्स त्ति । मुहुत्तअं आरुहामि । णेच्छामि कण्ण! णेच्छामि ।

कर्णः—किं नेच्छति भगवान् । अन्यदपि श्रूयतां,

§मदसरितकपोलं षट्पदैः सेव्यमानं
गिरिवरनिचयाभं मेघगम्भीरघोषम् ।
सितनखदशनानां वारणानामनेकं
रिपुसमरविमर्दं वृन्दमेतद् ददामि ॥ २० ॥

(क) गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण! नेच्छामि ।
(ख) अश्व इति । मुहूर्तकमारोहामि । नेच्छामि कर्ण! नेच्छामि ।

---

१. 'म' इ. पाठः.

---

§ मदेन मदजलेन सरितौ सञ्जातसरौ रेखितावित्यर्थः, कपोलौ यस्य तत् तथाभूतम् ।

शक्रः— (क) गअ त्ति । मुहुत्तअं आरुहामि[1] । णेच्छामि कण्ण! णेच्छामि ।

कर्णः— किं नेच्छति भगवान्[2] । अन्यदपि श्रूयताम् । अपर्याप्तं कनकं ददामि ।

शक्रः— (ख) गहिअ गच्छामि । (किञ्चिद् गत्वा) णेच्छामि कण्ण! णेच्छामि ।

कर्णः— तेन हि जित्वा पृथिवीं ददामि ।

शक्रः— (ग) पुहुवीए किं करिस्सं ।

कर्णः— तेन ह्यग्निष्टोमफलं ददामि ।

शक्रः— ( )[3] अग्गिट्ठोमफळेण किं कय्यं ।

कर्णः— तेन हि मच्छिरो ददामि ।

शक्रः— अविहा अविहा ।

(क) गज इति । मुहूर्तकमारोहामि । नेच्छामि कर्ण! नेच्छामि ।

(ख) गृहीत्वा गच्छामि । नेच्छामि कर्ण! नेच्छामि ।

(ग) पृथिव्या किं करिष्यामि ।

(घ) अग्निष्टोमफलेन किं कार्यम् ।

---

१. 'मि । (आरुह्यावलोक्य) णे' क. पाठः. २. 'न्। ते' क. पाठः. ३. 'तेण' क. पाठः.

कर्णः— न भेतव्यं न भेतव्यम् । प्रसीदतु भगवान् । अन्यदपि श्रूयताम् ।

अङ्गैः[1] सहैव जनितं मम देहरक्षा[2]
देवासुरैरपि न भेद्यमिदं सहास्त्रैः ।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवतो रुचितं यदि स्यात् ॥ २१ ॥

शक्रः— (सहर्षम्) (क) देदु देदु ।

कर्णः— (आत्मगतम्) एष एवास्य कामः । किन्नुखल्वनेक-कपटबुद्धेः कृष्णस्योपायः । सोऽपि च भवतु । धिगयुक्तमनुशोचितुम् । नास्ति संशयः । (प्रकाशम्) गृह्यताम् ।

शल्यः— अङ्गराज ! न दातव्यं न दातव्यम् ।

कर्णः— शल्यराज ! अलमलं वारयितुम् । पश्य,

शिक्षा क्षयं गच्छति कालपर्ययात्[3]
सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ॥ २२ ॥

(क) ददातु ददातु ।

---

१. 'न्' । अपर्याप्तं कनक ददामि । **शक्रः**— आणवेअ गच्छामि । णेच्छामि कण्ण । णेच्छामि । **कर्णः**— अ' क. पाठः. २ 'तौ' क. पाठ., ३. 'क्षौ' क. पाठः. ४, 'ये' ख. पाठः,

तस्माद् गृह्यताम् । (निकृत्य ददाति)

शक्रः— (गृहीत्वा आत्मगतम्) गृहीते एते । पूर्वमेवा(हम?)-र्जुनविजयार्थं सर्वदेवैर्यत्[1] समर्थितं, तदिदानीं मयानुष्ठितम् । त-स्मादहमप्यैरावतमारुह्यार्जुनकर्णयोर्युद्धविशेषं[2] पश्यामि । (निष्क्रान्तः)

शल्यः— अङ्गराज! वञ्चितः[3] खलु भवान् ।

कर्णः— केन ।

शल्यः— शक्रेण ।

कर्णः— न खलु । शक्रः खलु मया वञ्चितः । कुतः,

अनेकयज्ञाहुतितर्पितो द्विजैः
§किरीटिमान् दानवसङ्घमर्दनः ।
सुरद्विपास्फालनकर्कशाङ्गुलि-
र्मया कृतार्थः खलु पाकशासनः ॥ २३ ॥

(प्रविश्य ब्राह्मणरूपेण)

देवदूतः— भोः कर्ण! कवचकुण्डलग्रहणेपश्चात्तापेन[4] पुर-

---

१. 'मया समर्थितमिदमनु' क. पाठः. २. 'ह्य मत्पुत्रयोरर्जुन+++द्वन्द्वयुद्ध प' क. पाठः. ३. 'तो भ' क. पाठः. ४. 'णात् प' ख. पाठः.

---

§ किरीटिमान् अर्जुनवान् । किरीटिना स्वायत्तेनापि शक्रो न कृतार्थः, किन्तु मयैव कृतार्थ इति विशेषं ध्वनयितुमिदं विशेषणम् ।

न्दरेणानुगृहीतोऽसि । पाण्डवेष्वेकपुरुषवधार्थममोघमस्त्रं विमला नाम शक्तिरियं गृह्यताम् ।

कर्णः— धिग्, दत्तस्य न प्रतिगृह्णामि ।

देवदूतः[1]— ननु ब्राह्मणवचनाद् गृह्यताम् ।

कर्णः— ब्राह्मणवचनमिति । न मयातिक्रान्तपूर्वम् । कदा लभेय ।

देवदूतः[2]— यदा स्मरसि तदा लभस्व ।

कर्णः— बाढम् । अनुगृहीतोऽस्मि । प्रतिनिवर्ततां भवान् ।

देवदूतः[3]— बाढम् । (निष्क्रान्तः)

कर्णः— शल्यराज! यावद् रथमारोहावः[4] ।

शल्यः— बाढम् ।

(रथारोहणं नाटयतः[5])

कर्णः— अये शब्द इव श्रूयते । किन्नुखल्विदम् ।

शङ्खध्वनिः प्रलयसागरघोषतुल्यः[6]
कृष्णस्य वा न तु भवेत् स तु फल्गुनस्य ।
नूनं युधिष्ठिरपराजयकोपितात्मा
पार्थः करिष्यति यथाबलमद्य युद्धम् ॥ २४ ॥

---

१. 'ब्राह्मणः— न न, ब्रा' क. पाठः. २. 'ब्राह्मणः—' क. पाठः. ३. 'ब्राह्मणः—' क. पाठः. ४. 'ह्यावः' क. पाठः. ५. 'आरुह्य)' क. पाठः. ६. 'तुल्य-घोषः कृ' क. पाठः.

शल्यराज ! यत्रासावर्जुनः, तत्रैव चोद्यतां मम रथः ।

शल्यः — बाढम् ।

(भरतवाक्यम्)

§सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा ।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः ॥ २५ ॥

(निष्क्रान्तौ)

[१]**कर्णभारमवसितम् ।**

शुभं भूयात् ।

---

१. 'कवचाङ्कं समाप्तम् ।' ख. पाठः.

§ क. पुस्तके भरतवाक्यं नास्ति ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतम्

ऊरुभङ्गम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां
कर्णद्रौणिकृपोर्मिनक्रमकरां दुर्योधनस्रोतसम् ।
तीर्णः शत्रुनदीं शरासंसिकतां येन प्लवेनार्जुनः
शत्रूणां तरणेषु वः स भगवानस्तु प्लवः केशवः ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

एते स्मो भोः! एते स्मः ।

सूत्रधारः—भवतु, विज्ञातम् ।

(प्रविश्य)

पारिपार्श्वकः—भाव! कुतोनुखल्वेते,

स्वर्गार्थमाहवमुखोद्यतगात्रहोमा
नाराचतोमरशतैर्विषमीकृताङ्गाः ।
मत्तद्विपेन्द्रदशनोल्लिखितैः शरीरै-
रन्योन्यवीर्यनिकषाः पुरुषा भ्रमन्ति ॥ २ ॥

सूत्रधारः—मा(ष ? रिष !) किं नावगच्छसि । तनयशतनयशून्ये दुर्योधनावशेषे धृतराष्ट्रपक्षे, पाण्डवजनार्दनावशिष्टे युधिष्ठिरपक्षे, राज्ञां शरीरसमाकीर्णे समन्तपञ्चके,

एतद् रणाहतगजाश्वनरेन्द्रयौधं
सङ्कीर्णलेख्यमिव चित्रपटं प्रविद्धम् ।
युद्धे वृकोदरसुयोधनयोः प्रवृत्ते
यौधा नरेन्द्रनिधनैकगृहं प्रविष्टाः ॥ ३ ॥

(निष्क्रान्तौ)

स्थापना ।

(ततः प्रविशन्ति भटाश्रयः)

सर्वे—एते स्मो भोः ! एते स्मः ।

प्रथमः—

वैरस्याङ्क(त?थ)नं बलस्य निकषं मानप्रतिष्ठागृहं
युद्धेष्वप्सरसां स्वयंवरसभां शौर्यप्रतिष्ठां नृणाम् ।
राज्ञां पश्चिमकालवीरशयनं प्राणाग्निहोमक्रतुं
सम्प्राप्ता रणसंज्ञमाश्रमपदं राज्ञां नभःसङ्क्रमम् ॥ ४ ॥

द्वितीयः—सम्यग् भवानाह ।

उपलविषमा नागेन्द्राणां शरीरधराधरा
दिशि दिशि कृता गृध्रावासा हतातिरथा रथाः ।
अवनिपतयः स्वर्गं प्राप्ताः क्रियामरणे रणे
प्रतिमुखमिमे तत्तत् कृत्वा चिरं निहताहताः ॥ ५ ॥

तृतीयः—एवमेतत् ।

करिवरकरयूपो बाणविन्यस्तदर्भो
हतगजचयनोच्चो वैरवह्निप्रदीप्तः ।
ध्वजवितताविमानः सिंहनादोच्चमन्त्रः
पतितपशुमनुष्यः संस्थितो युद्धयज्ञः ॥ ६ ॥

प्रथमः—इदमपरं पश्येतां भवन्तौ ।

एते परस्परशरैर्हृतजीविताना
देहै रणाजिरमहीं समुपाश्रिताना ।
कुर्वन्ति चात्र पिशितार्द्रमुखा विहङ्गा
राज्ञां शरीरशिथिलानि विभूषणानि ॥ ७ ॥

द्वितीयः—

प्रसक्तनाराचनिपातपातितः
समग्रयुद्धोद्यतकल्पितो गजः ।
विशीर्णवर्मा सशरः सकार्मुको
नपायधागारमिवावसीदति ॥ ८ ॥

तृतीयः — इदमपरं पश्येतां भवन्तौ ।

माल्यैर्ध्वजाग्रपतितैः कृतमुण्डमालं
र(न्नै?न्त्यै)कसायक(व?ध)रं रथिनं विपन्नम् ।
जामातरं प्रवहणादिव बन्धुनार्यो
हृष्टाः शिवा रथमुखादवतारयन्ति ॥ ९ ॥

सर्वे — अहोतुखलु निहतपातितगजतुरगनररुधिरकालिल-भूमिप्रदेशस्य विक्षिप्तवर्मचर्मातपत्रचामरतोमरशरकुन्तकवचक-(ब)न्धादिपर्याकुलस्य शक्तिप्रासहाटकभिण्डिपालशूलमुसलमुद्ग-रवराहकर्णकणयकर्पणशङ्कुत्रासिगदादिभिरायुधैराकीर्णस्य सम-न्तपञ्चकस्य प्रतिभयता।

प्रथमः — इह हि,

रुधिरसरितो निस्तीर्यन्ते हतद्विपसङ्क्रमा
नृपतिरहितैः स्रस्तैः सूतैर्वहन्ति रथान् हयाः ।
पतितशिरसः पूर्वाभ्यासाद् द्रवन्ति कबन्धकाः
पुरुषरहिता मत्ता नागा भ्रमन्ति यतस्ततः ॥ १० ॥

द्वितीयः — इदमपरं पश्येतां भवन्तौ । एते,

गृध्रा मधूकमुकुलोन्नतपिङ्गलाक्षा
दैत्येन्द्रकुञ्जरनताङ्कुशतीक्ष्णतुण्डाः ।
भान्त्यम्बरे विततलम्बविकीर्णपक्षा
मांसैः प्रवालरचिता इव तालवृन्ताः ॥ ११ ॥

तृतीयः —

एषा निरस्तहयनागनरेन्द्रयौधा
व्यक्तीकृता दिनकरोग्रकरैः समन्तात् ।
नाराचकुन्तशरतोमरखड्गकीर्णा
तारागणं पतितमुद्वहतीव भूमिः ॥ १२ ॥

प्रथमः — ईदृश्यामप्यवस्थायामविमुक्तशोभा विराजन्ते क्षत्रियाः । इह हि,

(सत्रो?)*द्वर्तितनेत्रषट्पदगणा ताम्रोष्ठपत्रोत्करा
भ्रूभेदाञ्चितकेसरा स्वमकुटव्याविद्धसंवर्तिका ।
वीर्यादित्यविबोधिता रणमुखे नाराचनालोन्नता
निष्कम्पा स्थलपद्मिनीव रचिता राज्ञामभीतैर्मुखैः ॥१३॥

द्वितीयः — ईदृशानामपि क्षत्रियाणां मृत्युः प्रभवति । न शक्यं खलु विषमस्थैः पुरुषै राजबला(दा?धा)नं कर्तुम् ।

तृतीयः — किं(चि?च)रे(भ?) प्रभवति क्षत्रियाणामिति ।

प्रथमः — कः संशयः ।

‡**द्वितीयः —** मा मा भवानेवम् ।

स्पृष्ट्वा खाण्डवधूमराञ्जितगुणं संशप्तकोत्सादनं
स्वर्गाक्रन्दहरं निवातकवचप्राणोपहारं धनुः ।

---

* 'सिप्रो' इति स्यात् । 'सिप्रो निदाघसलिले' इति मेदिनी । ‡ 'तृतीय' इति स्यात् ।

पार्थेना(ङ्घ?घ) बलान्महेश्वररणक्षेपावशिष्टैः शरै-
र्दर्पोत्सिक्तवशा नृपा रणमुखे मृत्योः*प्रतिग्राहिताः ॥१४॥

सर्वे — अये शब्दः ।

किं मेघा निनदन्ति वज्रपतनैश्चूर्णीकृताः पर्वता
निर्घातैस्तुमुलस्वनप्रतिभयैः किं दार्यते वा मही ।
किं मुञ्चत्यनिलावधूतचपलक्षुब्धोर्मिमालाकुलं
शब्दं मन्दरकन्दरोदरदरीः संहत्य वा सागरः ॥१५॥

भवतु , पश्यामस्तावत् ।

(सर्वे परिक्रामन्ति)

प्रथमः — अये एतत् खलु द्रौपदीकेशधर्षणावमर्षितस्य पाण्डवमध्यमस्य भीमसेनस्य भ्रातृशतवधक्रुद्धस्य महाराजदुर्योधनस्य च द्वैपायनहलायुधकृष्णविदुरप्रमुखानां कुरुयदुकुलदैवतानां प्रत्यक्षं प्रवृत्तं गदायुद्धम् ।

द्वितीयः —

भीमस्योरसि (तप्त)काञ्चनशिलापीने प्रतिस्फालिते
भिन्ने वासवहस्तिहस्तकठिने दुर्योधनांसस्थले ।
अन्योन्यस्य भुजद्वयान्तरतटेष्वासज्यमानायुधे
यस्मिंश्चण्डगदाभिघातजनितः शब्दः समुत्तिष्ठति ॥१६॥

---

* प्रतिग्रहं प्रति कर्तुर्मृत्योरिह शेषत्वविवक्षणात् षष्ठी ।

तृतीयः—एष महाराजः,

शिष्टोत्कम्पनवल्गमान†मकुटः क्रोधाधिकाक्षाननः
स्थानाक्रामणवामनीकृततनुः प्रत्यग्रहस्तोच्छ्रयः ।
यस्यैषा रिपुशोणितार्द्रकलिला भात्यग्रहस्ते गदा
कैलासस्य गिरेरि(वोग्रचरिताद्भोता?)‡ महेन्द्राश(पि?निः)॥१७॥

प्रथमः—एष सम्प्रहाररुधिरसिक्ताङ्गस्तावद् दृश्यतां पाण्डवः ।

निर्भिन्नाग्रललाटवान्तरुधिरो भग्नांसकूटद्वयः
सान्द्रैर्निर्गलितप्रहाररुधिरैरार्द्रीकृतोरःस्थलः ।
भीमो भाति गदाभिघातरुधिराक्लिन्नावगाढव्रणः
शैलो मेरुरिवैष धातुसलिलासारोपदिग्धोपलः ॥ १८ ॥

द्वितीयः—

भीमां गदां क्षिपति गर्जति वल्गमानः
शीघ्रं भुजं हरति तस्य कृतं भिनत्ति ।
चारीं गतिं प्रचरति प्रहरत्यभीक्ष्णं
संशिक्षितो नरपतिर्बलवांस्तु भीमः ॥ १९ ॥

---

† वल्गमानेति चानशान्तं बोध्यम् । ‡ 'वाग्रशिखरोद्भूता' इति पाठ्यं भाति ।

तृतीयः—एष वृकोदरः,

शिरसि गुरुनिखातस्रस्तरक्तार्द्रगात्रो
धरणिधरनिकाशः संयुगेष्वप्रमेयः ।
प्रविशति गिरिराजो मेदिनीं वज्रदग्धः
शिथिलविसृतधातुर्हेमकूटो यथाद्रिः ॥ २० ॥

एष गाढप्रहारशिथिलीकृताङ्गं निपतन्तं भीमसेनं दृष्ट्वा,

एकाग्राङ्गुलिधारितोन्नतमुखो व्यासः स्थितो विस्मितः

द्वितीयः—

दैन्यं याति युधिष्ठिरोऽत्र विदुरो बाष्पाकुलाक्षः स्थितः ।

तृतीयः—

स्पृष्टं गाण्डिवमर्जुनेन गगनं कृष्णः समुद्वीक्षते

सर्वे—

शिष्यप्रीतितया हलं भ्रमयते रामो रणप्रेक्षकः ॥ २१ ॥

प्रथमः—एष महाराजः,

वीर्यालयो विविधरत्नविचित्रमौलि-
र्युक्तोऽभिमानविनयद्युतिसाहसैश्च ।
वाक्यं वदत्युपहसन्न तु भीम! दीनं
वीरो निहन्ति समरेषु भयं त्यजेति ॥ २२ ॥

द्वितीयः—एष इदानीमपहास्यमानं भीमसेनं दृष्ट्वा स्वमूरुमभिहत्य कामपि संज्ञां प्रयच्छति जनार्दनः ।

तृतीयः—एष संज्ञया समाश्वासितो मारुतिः,

संहृत्य भ्रुकुटी ललाटविवरे स्वेदं करेणाक्षिपन्
बाहुभ्यां प्रतिगृह्य भीमवदनश्चित्राङ्गदां स्वां गदाम् ।
पुत्रं दीनमुदीक्ष्य *सर्वगतिना लब्ध्वेव दत्तं बलं
गर्जन् सिंहवृषेक्षणः क्षितितलाद् भूयः समुत्तिष्ठति ॥ २३ ॥

प्रथमः—हन्त पुनः प्रवृत्तं गदायुद्धम् । अनेन हि,

भूमौ पाणितले निघृष्य तरसा बाहू प्रमृज्याधिकं
सन्दष्टोष्ठपुटेन विक्रमबलात् क्रोधाधिकं गर्जता ।
त्यक्त्वा धर्मघृणां विहाय समयं कृष्णस्य संज्ञासमं
गान्धारीतनयस्य पाण्डुतनयेनोर्वोर्विमुक्ता गदा ॥ २४ ॥

सर्वे— हा धिक् पतितो महाराजः ।

तृतीयः— एष रुधिरपतनद्योतिताङ्गं निपतन्तं कुरुराजं दृष्ट्वा खमुत्पतितो भगवान् द्वैपायनः । (य एषः?)§

हेलासंवृतलोचनेन हलिना नेत्रोपरोधः कृतो
दृष्ट्वा क्रोधनिमीलितं हलधरं दुर्योधनापेक्षया ।
सम्भ्रान्तैः करपञ्जरान्तरगतो द्वैपायनज्ञापितो
भीमः कृष्णकरावलम्बितगतिर्निर्वाह्यते पाण्डवैः ॥ २५ ॥

प्रथमः— अये अयमप्यमर्षोन्मीलित(रभसं?)लोचनो भीम-

---

* सर्वगतिना वायुना । § 'द्वितीयः—' इति स्यात् ।

सेनापक्रमणमुद्वीक्षमाण इत एवाभिवर्तते भगवान् हलायुधः। य एषः,

प्रचललितमौलिः क्रोधताम्रायताक्षो
भ्रमरमुखविदष्टां किञ्चिदुत्कृष्य मालाम् ।
असिततनुविलम्बिस्रस्तवस्त्रानुकर्षी
क्षितितलमवतीर्णः पारिवेषीव‡ चन्द्रः ॥ २६ ॥

द्वितीयः — तदागम्यतां वयमपि तावन्महाराजस्य प्रत्यनन्तरीभवामः।

उभौ — बाढम्। प्रथमः कल्पः ।

(निष्क्रान्ताः)

विष्कम्भकः ।

(ततः प्रविशति बलदेवः)

बलदेवः — भो भोः पार्थिवाः ! न युक्तमिदम् ।

मम रिपुबलकालं लाङ्गलं लङ्घयित्वा
रणगतमतिसन्धिं मां च नावेक्ष्य दर्पात् ।
रणशिरसि गदां तां तेन दुर्योधनोर्वोः
कुलविनयसमृद्ध्या *पातितः पातयित्वा ॥ २७ ॥

भो दुर्योधन! मुहूर्तं तावदात्मा धार्यताम् ।

---

‡ परिवेष एव पारिवेषः । स्वार्थेऽण् । तद्वान् पारिवेषी । * पातित इत्यर्थाद् दुर्योधनः ।

सौभोच्छिष्टमुखं महासुरपुरप्राकारकूटाङ्कुशं
कालिन्दीजलदेशिकं रिपुबलप्राणोपहारार्चितम् ।
हन्तोत्क्षि(त?प्य)हलं करोमि रुधिरस्वेदार्द्रपाकोत्त(रं?रे)
भीमस्योरसि यावदद्य विपुले केदारमार्गाकुलम्* ॥ २८ ॥

(नेपथ्ये)

प्रसीदतु प्रसीदतु भगवान् हलायुधः ।

बलदेवः — एवंगतोऽप्यनुगच्छति मां तपस्वी दुर्योधनः । एषः,

श्रीमान् संयुगचन्दनेन रुधिरेणार्द्रानुलिप्तच्छवि-
र्भूसंसर्पणरेणुपाटलभुजो बालव्रतं ग्राहितः ।
निर्वृत्तेऽमृतमन्थने क्षितिधरान्मुक्तः सुरैः सासुरै-
राकर्षन्निव भोगमर्णवजले श्रान्तोज्झितो वासुकिः ॥२९॥

(ततः प्रविशति भग्नोरुयुगलो दुर्योधनः)

दुर्योधनः — एष भोः !

भीमेन भित्त्वा समयव्यवस्थां
गदानिपातक्षतजर्जरोरुः ।
भूमौ भुजाभ्यां परि(कर्ष?कृष्य)माणं
स्वं देहमर्धोपरतं वहामि ॥ ३० ॥

---

* केदारमार्गे आकुल व्यापारव्यग्रम । उरोरूपेऽधिकरणे केदारमार्गव्यापारोक्त्या उरसः केदाराभेदोऽर्थसिद्धः ।

प्रसीदतु प्रसीदतु भगवान् हलायुधः ।

त्वत्पादयोर्निपतितं पतितस्य भूमा-
वेतच्छिरः प्रथममद्य विमुञ्च रोषम् ।
जीवन्तु ते कुरुकुलस्य निवापमेघा
वैरं च विग्रहकथा च वयं च नष्टाः ॥ ३१ ॥

बलदेवः—भो दुर्योधन! मुहूर्तं तावदात्मा धार्यताम् ।

दुर्योधनः—किं भवान् करिष्यति ।

बलदेवः—श्रूयताम्,

आक्षिप्तलाङ्गलमुखोल्लिखितैः शरीरै-
र्निर्दारितांसहृदयान्मुसलप्रहारैः ।
दास्यामि संयुगहतान् सरथाश्वनागान्
स्वर्गानुयात्रपुरुषांस्तव पाण्डुपुत्रान् ॥ ३२ ॥

दुर्योधनः— मा मा भवानेवम् ।

प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम् ।
मयि चैवं गते राम! विग्रहः किं करिष्यति ॥ ३३ ॥

बलदेवः—(त?म)त्प्रत्यक्षं वञ्चितो भवानित्युत्पन्नो मे रोषः ।

दुर्योधनः—वञ्चित इति मां भवान् मन्यते ।

बलदेवः—कः संशयः ।

दुर्योधनः—हन्त भोः! दत्तमूल्या इव मे प्राणाः । कुतः,

आदीप्तानलदारुणाजतुगृहाद् बुद्ध्यात्मनिर्वाहिणा
युद्धे वैश्रवणालयेऽचलशिलावेग(प्रतीसालिना?*) ।
भीमेनाद्य हिडिम्बराक्षसपतिप्राणप्रतिग्राहिणा
यद्येवं समवैषि मां छलजितं भो राम! नाहं जितः॥ ३४ ॥

बलदेवः— भीमसेन इदानीं तव युद्धवञ्चनामुत्पाद्य स्थास्यति ।

दुर्योधनः— किं चाहं भीमसेनेन वञ्चितः ।

बलदेवः— अथ केन भवानेवंविधः कृतः ।

‡**राजा**— श्रूयतां ,

येनेन्द्रस्य स पारिजातकतरुर्भानेन तुल्यं हृतो
दिव्यं वर्षसहस्रमर्णवजले सुप्तश्च यो लीलया ।
तीव्रां भीमगदां प्रविश्य सहसा निर्व्याजयुद्धप्रिय-
स्तेनाहं जगतः प्रियेण हरिणा मृत्योः प्रतिग्राहितः॥ ३५ ॥

(नेपथ्ये)

(क) उस्सरह अय्या! उस्सरह ।

बलदेवः— (विलोक्य) अये अयमत्रभवान् धृतराष्ट्रो गान्धा-(री?र्या) दुर्जयेनादेशितमार्गोऽन्तःपुरानुबन्धः शोकाभिभूतहृदय

(क) उत्सरतार्याः! उत्सरत ।

---

* 'प्रतीसारिणा' इति स्यात् । ‡ राजा दुर्योधनः ।

इत एवाभिवर्तते । य एषः,

वीर्याकरः सुतशतप्रविभक्तचक्षु-
र्दर्पोद्यतः कनकयूपविलम्बबाहुः ।
सृष्टो ध्रुवं त्रिदिवरक्षणजातशङ्कै-
र्देवैररातितिमिराञ्जलिताडिताक्षः(?) ॥ ३६ ॥

(ततः प्रविशति धृतराष्ट्रो गान्धारी देव्यौ दुर्जयश्च)

धृतराष्ट्रः — पुत्र ! क्वासि ।

गान्धारी — (क) पुत्तअ ! कहिं सि ।

देव्यौ — (ख) महाराअ ! कहिं सि ।

धृतराष्ट्रः — भोः ! कष्टम् ।

वञ्चनानिहतं श्रुत्वा सुतमद्याहवे मम ।
मुखमन्तर्गतास्राक्षमन्धमन्धतरं कृतम् ॥ ३७ ॥

गान्धारि ! किं धरसे ।

गान्धारी — (ग) जीवाविद्ध म्हि मन्दभाआ ।

देव्यौ — (घ) महाराज ! महाराअ ! ।

(क) पुत्रक ! क्वासि ।

(ख) महाराज ! कुत्रासि ।

(ग) जीवितास्मि मन्दभागा

(घ) महाराज ! महाराज ! ।

राजा — भोः ! कष्टम् । यन्ममापि स्त्रियो रुदन्ति ।

पूर्वं न जानामि गदाभिघात-
रुजामिदानीं तु समर्थयामि ।
यन्मे प्रकाशीकृतमूर्धजानि
रणं प्रविष्टान्यवरोधनानि ॥ ३८ ॥

धृतराष्ट्रः — गान्धारि ! किं दृश्यते दुर्योधननामधेयः कुलमानी ।

गान्धारी — (क) महाराअ ! ण दिस्सदि ।

धृतराष्ट्रः — कथं न दृश्यते । अद्यास्मि, योऽहमन्वेष्टव्ये काले पुत्रं न पश्यामि । कृतान्तहतक !

रिपुसमरविमर्दं मानवीर्यप्रदीप्तं
सुतशतमतिधीरं वीरमुत्पाद्य मा(नं?नी) ।
धरणितलविकीर्णं किं स योग्यो न भोक्तुं
सकृदपि धृतराष्ट्रः पुत्रदत्तं निवापम् ॥ ३९ ॥

गान्धारी — (ख) जाद ! सुयोधण ! देहि मे पडिवअणं । [1] पुत्तसदविणासदुक्खिदं महाराअं च मन्दभाअं [1] ।

(क) महाराज ! न दृश्यते ।

(ख) जात ! सुयोधन ! देहि मे प्रतिवचनम् । पुत्रशतविनाशदुःखितं महाराजं च मन्दभागम् ।

---

[1] 'संभावेहि' इति शेषः ।

बलदेवः—अये इयमत्रभवती गान्धारी ।

या पुत्रपौत्रवदनेष्वकुतूहलाक्षी
†दुर्योधनास्तमितशोकनिपीतधैर्या ।
अस्रैरजस्रमधुना पतिधर्मचिह्न-
मार्द्रीकृतं *नयनबन्धमिदं दधाति ॥ ४० ॥

धृतराष्ट्रः—पुत्र! दुर्योधन! अष्टादशाक्षौहिणीमहाराज! क्वासि ।

राजा—अद्यास्मि महाराजः ।

धृतराष्ट्रः—पुत्रशतज्येष्ठ! देहि मे प्रतिवचनम् ।

दुर्योधनः—(अन्य)न्ददामि खलु वृत्तान्तम् । अनेन वृत्तान्तेन व्रीलितोऽस्मि ।

धृतराष्ट्रः—एहि पुत्र! अभिवादयस्व माम् ।

राजा—अयमयमागच्छामि । (उत्थानं रूपयित्वा पतति) हा धिक् । अयं मे द्वितीयः प्रहारः । कष्टं भोः!

हृतं मे भीमसेनेन गदापातकचग्रहे ।
सममूरुद्वयेनाद्य गुरोः पादाभिवन्दनम् ॥ ४१ ॥

---

† दुर्योधनस्यास्तमितेनास्तमयेन य. शोकः, तेन निर्पातधैर्या । * नयनं बध्नातीति नयनबन्धं नयनाच्छादनवस्त्रमित्यर्थः ।

गान्धारी — (क) एत्थ जादा ! ।

देव्यौ — (ख) अय्ये ! इमा ह्म ।

गान्धारी — (ग) अण्णेसह भत्तारं ।

देव्यौ — (घ) गच्छामि मन्दभाआ ।

धृतराष्ट्रः — क एष भोः ! मम वस्त्रान्तमाकर्षन् मार्गमा-देशयति ।

दुर्जयः — (ङ) ताद ! अहं दुज्जयो ।

धृतराष्ट्रः — पौत्र ! दुर्जय ! पितरमन्विच्छ ।

दुर्जयः — (च) परिस्सन्तो खु अहं ।

धृतराष्ट्रः — गच्छ, पितुरङ्के विश्रमयिष्यसि ।

दुर्जयः — (छ) ताद ! अहं गच्छामि । (उपसृत्य) ताद ! कहिं सि ।

(क) अत्र जाते ! ।

(ख) आर्ये ! इमे स्वः ।

(ग) अन्वेषेथा भर्तारम् ।

(घ) गच्छामि मन्दभागा(?) ।

(ङ) तात ! अहं दुर्जयः ।

(च) परिश्रान्तः खल्वहम् ।

(छ) तात ! अहं गच्छामि । तात ! कुत्रासि ।

राजा — अये अयमप्यागतः । सर्वावस्थायां हृदयसन्निहितः पुत्रस्नेहो मां दहति । कुतः,

दुःखानामनभिज्ञेयो ममाङ्कशयनोचितः ।
निर्जितं दुर्जयो दृष्ट्वा किन्नु मामभिधास्यति ॥ ४२ ॥

दुर्जयः — (क) अअं महाराओ भूमीए उवविट्ठो ।

राजा — पुत्र ! किमर्थमागतः ।

दुर्जयः — (ख) तुवं चिरायसि त्ति ।

राजा — अहो अस्यामवस्थायां पुत्रस्नेहो हृदयं दहति ।

दुर्जयः — (ग) अहं पि खु दे अङ्के उवविसामि । (अङ्कमारोहति)

राजा — (निवार्य) दुर्जय ! दुर्जय ! भोः ! कष्टम् ।

हृदयप्रीतिजननो यो मे नेत्रोत्सवः स्वयम् ।
सोऽयं कालविपर्यासाच्चन्द्रो वह्नित्वमागतः ॥ ४३ ॥

दुर्जयः — (घ) अङ्के उववेसं किंणिमित्तं तुवं वारेसि ।

(क) अयं महाराजो भूम्यामुपविष्टः ।

(ख) त्व चिरायसीति ।

(ग) अहमपि खलु ते अङ्के उपविशामि ।

(घ) अङ्के उपवेश किंनिमित्तं त्वं वारयसि ।

राजा —

त्यक्त्वा परिचितं पुत्र! यत्रतत्र त्वयास्यताम् ।
अद्यप्रभृति नास्तीदं पूर्वभुक्तं तवासनम् ॥ ४४ ॥

दुर्जयः — (क) कहिंणुखु महाराओ गमिस्सदि ।

राजा — भ्रातृशतमनुगच्छामि ।

दुर्जयः — (ख) मं पि तहिं णेहि ।

राजा — गच्छ पुत्र! वृकोदरं ब्रूहि ।

दुर्जयः — (ग) एहि महाराअ! अण्णेसीअसि ।

राजा — पुत्र! केन ।

दुर्जयः — (घ) अय्याए, अय्येण, सव्वेण अन्तउरेण अ ।

राजा — गच्छ पुत्र! नाहमागन्तुं समर्थः ।

दुर्जयः — (ङ) अहं तुवं णइस्सं ।

राजा — बालस्त्वमसि पुत्र!।

दुर्जयः — (परिक्रम्य) (च) अय्या! अअं महाराओ ।

(क) कुत्रनुखलु महाराजो गमिष्यति ।
(ख) मामपि तत्र नय ।
(ग) एहि महाराज! अन्विष्यसे ।
(घ) आर्ययार्येण सर्वेणान्तःपुरेण च ।
(ङ) अहं त्वां नेष्यामि ।
(च) आर्याः! अयं महाराजः ।

देव्यौ — (क) हा हा महाराओ ।

धृतराष्ट्रः — क्वासौ महाराजः ।

गान्धारी — (ख) कहिं मे पुत्तओ ।

दुर्जयः — (ग) अअं महाराओ भूमीए उवविट्ठो ।

धृतराष्ट्रः — हन्त भोः ! किमयं महाराजः ।

यः काञ्चनस्तम्भसमप्रमाणो
लोके किलैको वसुधाधिपेन्द्रः ।
कृतः स मे भूमिगतस्तपस्वी
हारेन्द्रकीलार्धसमप्रमाणः ॥ ४५ ॥

गान्धारी — (घ) जाद ! सुयोधण ! परिस्सन्तो सि ।

राजा — भवत्याः खल्वहं पुत्रः ।

धृतराष्ट्रः — केयं भोः ! ।

गान्धारी — (ङ) महाराअ ! अहमभीदपुत्तप्पआइणी ।

(क) हा हा महाराजः ।

(ख) क्व मे पुत्रकः ।

(ग) अय महाराजो भूम्यामुपविष्टः ।

(घ) जात! सुयोधन ! परिश्रान्तोऽसि ।

(ङ) महाराज ! अहमभीतपुत्रपदायिनी ।

राजा — अद्योत्पन्नमिवात्मानमवगच्छामि । भोस्तात! किमिदानीं वैक्लव्येन ।

धृतराष्ट्रः — पुत्र! कथं विक्लबो भविष्यामि ।

यस्य वीर्यबलोत्सिक्तं संयुगाध्वरदीक्षितम् ।
पूर्वं भ्रातृशतं नष्टं त्वय्येकस्मिन् हते हतम् ॥ ४६ ॥

(पतति)

राजा — हा धिक् । पतितोऽत्रभवान् । तात! समाश्वासयात्रभवतीम् ।

धृतराष्ट्रः — पुत्र! किमिति समाश्वासयामि ।

राजा — अपराङ्मुखो युधि हत इति । भोस्तात! शोकनिग्रहेण क्रियतां ममानुग्रहः ।

त्वत्पादमात्रप्रणताग्रमौलि-
र्ज्वलन्तमप्यग्निम्† अचिन्तयित्वा ।
येनैव मानेन समं प्रसूत-
स्तेनैव मानेन दिवं प्रयामि ॥ ४७ ॥

धृतराष्ट्रः —

वृद्धस्य मे जीवितनिस्स्पृहस्य
निसर्गसम्मीलितलोचनस्य ।

---

† नित्याराधनविषयं गृह्णामिमित्यर्थः ।

धृतिं निगृह्यात्मनि सम्प्रवृत्त-
स्तीव्रः समाक्रामति पुत्रशोकः ॥ ४८ ॥

बलदेवः — भोः! कष्टम् ।

दुर्योधननिराशस्य नित्यास्तमितचक्षुषः ।
न शक्नोम्यत्रभवतः कर्तुमात्मनिवेदनाम् ॥ ४९ ॥

राजा — विज्ञापयाम्यत्रभवतीम् ।

गान्धारी — (क) भणाहि जाद!।

राजा —

नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम् ।
अन्यस्यामपि जात्यां मे त्वमेव जननी भव ॥ ५० ॥

गान्धारी — (ख) मम मणोरहो खु तुए भाणिदो ।

राजा — मालवि! त्वमपि शृणु ।

भिन्ना मे भ्रुकुटी गदानिपतितै(र्या ? र्व्या)युद्धकालोत्थितै-
र्वक्षस्युत्पतितैः प्रहारुधिरैर्हारावकाशो हृतः ।
पश्येमौ व्रणकाञ्चनाङ्गदधरौ पर्यासशोभौ भुजौ
भर्ता ते नपराङ्मुखो युधि हतः किं क्षत्रिये! रोदिषि ॥ ५१ ॥

देवी — (ग) बाळा एसा सहधम्मचारिणी रोदामि ।

(क) भण जात! ।
(ख) मम मनोरथः खलु त्वया भणितः ।
(ग) बाला एषा सहधर्मचारिणी रोदिमि ।

राजा — पौरवि ! त्वमपि शृणु ।

वेदोक्तैर्विविधैर्मखैरभिमतैरिष्टं धृता बान्धवाः
शत्रूणामुपरि स्थितं प्रियश(तं न ? तान्न)व्यंसिताः संश्रिताः ।
युद्धेऽष्टादशवाहिनीनृपतयः सन्तापिता निग्रहे
मानं मानिनि! वीक्ष्य मे† नहि रुदन्त्येवंविधानां स्त्रियः॥५२॥

पौरवी — (क) एक्ककिदप्पवेसणिच्चआ ण रोदामि ।

राजा — दुर्जय! त्वमपि शृणु ।

धृतराष्ट्रः — गान्धारि! किन्नुखलु वक्ष्यति ।

गान्धारी — (ख) अहं पि तं जव्व चिन्तेमि ।

राजा — अहमिव पाण्डवाः शुश्रूषयितव्याः*, तत्रभवत्या-श्चाम्बायाः कुन्त्या निदेशो वर्तयितव्यः । अभिमन्योर्जननी द्रौपदी चोभे मातृवत् पूजयितव्ये । पश्य पुत्र!

श्लाघ्यश्रीरभिमानदीप्तहृदयो दुर्योधनो मे पिता
तुल्येनाभिमुखं रणे हत इति त्वं शोकमेवं त्यज ।

(क) एककृतप्रवेशनिश्चया न रोदिमि ।

(ख) अहमपि तदेव चिन्तयामि ।

---

† एतदुत्तरं 'न त्वया शोचितु युक्तम्' इति गम्यमर्थमादाय वाक्य पूरणीयम् । ततः सामान्यन्यायोपन्यासो नहीत्यादिना । * शुश्रूषितव्या इत्यर्थः ।

स्पृष्ट्वा चैव युधिष्ठिरस्य विपुलं क्षौमापसव्यं भुजं
देयं पाण्डुसुतैस्त्वया मम समं नामावसाने जलम ॥ ५३ ॥

बलदेवः — अहो वैरं पश्चात्तापः संवृत्तः । अये शब्द इव

सन्नाहदुन्दुभिनिनादवियोगमूके
विक्षिप्तबाणकवचव्यजनातपत्रे ।
कस्यैष कार्मुकरवो हतसूतयोधे†
विभ्रान्तवायसगणं गगनं करोति ॥ ५४ ॥

(नेपथ्ये)

दुर्योधनेनाततकार्मुकेण
यो युद्धयज्ञः सहितः प्रविष्टः ।
तमेव भूयः प्रविशाम्यशून्य-
मध्वर्युणा वृत्तमिवाश्वमेधम् ॥ ५५ ॥

बलदेवः — अये अयं गुरुपुत्रोऽश्वत्थामेत एवाभिवर्तते । [ह

एषः,

स्फुटितकमलपत्रस्पष्टविस्तीर्णदृष्टी
रुचिरकनकयूपव्यायतालम्बबाहुः ।
सरभसमयमुग्रं कार्मुकं कर्षमाणः*
सदहन इव मेरुः शृङ्गलग्नेन्द्रचापः ॥ ५६ ॥

---

† देशे इति वा काले इति वा विशेष्य गम्यम् । * चानशन्तामिवम् ।

(ततः प्रविश्याश्वत्थामा)

अश्वत्थामा — (पूर्वोक्तमेव पठित्वा) भोः ! समरसंरम्भोभयबलजलधिसङ्गमसमयसमुत्थितशस्त्रनक्रकृत्तविग्रहाः स्तोकावशेषाः श्वासानुबद्धमन्दप्राणाः समरश्लाघिनो राजानः ! शृण्वन्तु शृण्वन्तु भवन्तः ।

छलबलदलितोरुः कौरवेन्द्रो न चाहं
शिथिलविफलशस्त्रः सूतपुत्रश्च नाहम् ।
इह तु विजयभूमौ द्रष्टुमद्योद्यतास्त्रः
सरभसमहमेको द्रोणपुत्रः स्थितोऽस्मि ॥ ५७ ॥

किमनया ममाप्यप्रतिलाभविजयश्लाघया समरश्रिया । (परिक्रम्य) मा तावत् । मयि गुरुनिवपनव्यग्रे वञ्चितः कुरुतिलकभूतः कुरुराजः । क एतच्छ्रद्धास्यति । कुतः,

उद्यत्प्राञ्जलयो रथद्विपगताश्चापद्वितीयैः करै-
र्यस्यैकादशवाहिनीनृपतयस्तिष्ठन्ति वाक्योन्मुखाः ।
भीष्मो रामशरावलीढकवचस्तातश्च योद्धा रणे
व्यक्तं निर्जित एव सोऽप्यतिरथः कालेन दुर्योधनः ॥५८॥

तत् कनुखलु गतो गान्धारीपुत्रः । (परिक्रम्यावलोक्य) अये अयमभिहतगजतुरगनररथप्राकारमध्यगतः समरपयोधिपारगः कुरुराजः । य एषः,

‡मौलीनिपातचलकेशमयूखजालै-
गात्रैर्गदानिपतनक्षतशोणिताद्यैः ।
यात्यस्तमस्तकशिलातलसन्निविष्टः
सन्ध्यावगाढ इव पश्चिमकालसूर्यः ॥ ५९ ॥

(उपसृत्य) भोः कुरुराज ! किमिदम् ।

राजा — गुरुपुत्र ! फलमपरितोषस्य ।

अश्वत्थामा — भोः कुरुराज ! सत्कारमूलमार्जयिष्यामि

राजा — किं भवान् करिष्यति ।

अश्वत्थामा — श्रूयतां ,

युद्धोद्यतं गरुडपृष्ठनिविष्टदेहं
*(वष्टाष्ट?)भीमभुजमुद्यतशार्ङ्गचक्रम् ।
कृष्णं सपाण्डुतनयं युधि शस्त्रजालैः
सङ्कीर्णलेख्यमिव चित्रपटं क्षिपामि ॥ ६० ॥

राजा — मा मा भवानेवम् ।

गतं धात्र्युत्सङ्गे सकलमभिषिक्तं नृपकुलं
गतः कर्णः स्वर्गं निपततनुः शान्तनुसुतः ।

---

‡ 'मौलेः किरीटे धम्मिल्ले चूडायामनपुंसकम्' इति मेदिनी । ईकारस्तु तत्र 'कृदिक रादक्तिन.' इति ङीषि । * 'वष्टाष्ट' इत्यस्य स्थाने 'अष्टार्ध' इति पाठ्य भाति ।

शतं भ्रातॄणां मे हतमभिमुखं संयुगमुखे
वयं चैवम्भूता गुरुसुत ! धनुर्मुञ्चतु भवान् ॥ ६१ ॥

अश्वत्थामा — भोः कुरुराज !

संयुगे पाण्डुपुत्रेण गदापातकचग्रहे ।
सममूरुद्वयेनाद्य दर्पोऽपि भवतो हृतः ॥ ६२ ॥

राजा — मा मैवम् । मानशरीरा राजानः । मानार्थमेव मया निग्रहो गृहीतः । पश्य गुरुपुत्र !

यत् कृष्टा करनिग्रहाञ्चितकचा द्यूते तदा द्रौपदी
यद् बालोऽपि हतस्तदा रणमुखे पुत्रोऽभिमन्युः पुनः ।
अक्षव्याजजिता वनं वनमृगैर्यत् पाण्डवाः संश्रिता
नन्वल्पं मयि तैः कृतं विमृश भो! दर्पाहृतं[¶] दीक्षितैः ॥ ६३ ॥

अश्वत्थामा — सर्वथा कृतप्रतिज्ञोऽस्मि ।

भवता वात्मना चैव वीरलोकैः शपाम्यहम् ।
निशासमरमुत्पाद्य रणे धक्ष्यामि पाण्डवान् ॥ ६४ ॥

बलदेवः — एतद् भविष्यत्युदाहृतं गुरुपुत्रेण ।

अश्वत्थामा — हलायुधोऽत्रभवान् ।

धृतराष्ट्रः — हन्त साक्षिमती खलु वञ्चना ।

अश्वत्थामा — दुर्जय! इतस्तावत् ।

¶ दर्पाहृत दर्पाहरणम् ।

पितृविक्रमदायाद्ये राज्ये भुजबलार्जिते ।
विनाभिषेकं राजा त्वं विप्रोक्तैर्वचनैर्भव ॥ ६५ ॥

राजा—हन्त कृतं मे हृदयानुज्ञातम् । परित्यजन्ति मे प्राणाः । इमेऽत्रभवन्तः शान्तनुप्रभृतयो मे पितृपितामहाः । एतत् कर्णमग्रतः कृत्वा समुत्थितं भ्रातृशतम् । अयमप्यैरावतशिरोविषक्तः काकपक्षधरो महेन्द्रकरतलमवलम्ब्य क्रुद्धोऽभिभाषते मामभिमन्यः । (इमा) उर्वश्यादयोऽप्सरसो मामभिगताः । इमे मूर्तिमन्तो महार्णवाः । एता गङ्गाप्रभृतयो महानद्यः । एष सहस्रहंसप्रयुक्तो मां नेतुं वीरवाही विमानः कालेन प्रेषितः । अयमयमागच्छामि । (स्वर्गं गतः)

(यवनिकास्तरणं करोति)

(धृतराष्ट्रः)—

याम्येष सज्जनधनानि तपोवनानि
पुत्रप्रणाशविफलं हि धिगस्तु राज्यम् ।

अश्वत्थामा—

यातोऽद्य सौप्तिकवधोद्यतबाणपाणिः
*गां पातु नो नरपतिः शमितारिपक्षः ॥ ६६ ॥

(निष्क्रान्ताः सर्वे)

ऊरुभङ्गमवसितम् ।

शुभं भूयात् ।

* इतः प्राग् '(भरतवाक्यम्)' इत्यपेक्षितम् ।

TRIVANDRUM SANSKRIT SERIES.

NO XVII.

THE PANCHARÂTRA OR BHÂSA

EDITED WITH NOTES

BY

T. GAṆAPATI SÂSTRÍ.

Curator of the Department for the publication of Sanskrit manuscripts.

TRIVANDRUM

Bhasa's Works.—No. 3.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE

TRIVANDRUM.

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1912.

(All Rights Reserved)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १७.

पञ्चरात्र

महाकविश्रीभासप्रणीतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

सशोधितं

लघुटिप्पण्या च संयोजितम ।

भासनाटकचक्रे तृतीयम् ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

कोळम्बाब्दाः १०८७, क्रैस्ताब्दाः १९१२.

पात्राणि ।

दुर्योधनः = हास्तिनेश्वरः ।

भीष्मः = दुर्योधनादीनां पितामहः ।

द्रोणः = दुर्योधनादीनां धनुराचार्यः ।

कर्णः = अङ्गेश्वरो दुर्योधनस्य सखा ।

शकुनिः = दुर्योधनस्य मातुलः ।

भटः = दुर्योधनस्य भृत्यः ।

वृद्धगोपालकः = गोकुलाध्यक्षः ।

गोमित्रकः = काश्चिद् गोपालः ।

राजा = मत्स्यदेशाधिपतिर्विराटनामा ।

भगवान् = ब्राह्मणव्यञ्जनो धर्मपुत्रः ।

भीमसेनः = धर्मपुत्रस्यानुजः ।

अर्जुनः = तथा ।

बृहन्नला = अर्जुनः ।

अभिमन्युः = अर्जुनस्य पुत्रः ।

उत्तरः = विराटस्य पुत्रः ।

सूतः = विराटस्य अभिमन्योश्च सारथिः ।

काञ्चुकीयः = विराटस्य परिजनः ।

दूतः = तथा ।

भटः = विराटस्य भृत्यः ।

कथावस्तुसंक्षेपः ।

दुर्योधनो यज्ञावभृथान्ते ब्राह्मणसन्तर्पणावसरे धनुराचार्यं द्रोणं तस्याभीष्टदक्षिणां पृष्टवान् । पाण्डवेभ्योऽर्धराज्यदानमेव मम सुदक्षिणेति तेन निवेदितं शकुनिना सह सम्मन्त्र्य 'यदि पञ्चरात्रेण पाण्डवानामज्ञातवासिना प्रवृत्तिरुपनीयते, तर्हि तेभ्योऽर्धराज्य दद्याम्' इति स प्रतिजज्ञे । कीचकशतविशसननिवेदकेन विराटदूतवचनेन पाण्डवानां विराटनगरेऽज्ञातं वास निश्चिन्वन् भीष्मस्तदाचार्यमभ्युपगमय्य स्वस्य विराटेनाप्रकाशं वैरमपदिशन् तदीयगोग्रहणाय दुर्योधनमुद्योजयामास । तेन च ससैन्येन विराटनगरमुपरुध्य गोग्रहणे क्रियमाणे बृहन्नलाव्यञ्जनोऽर्जुन उत्तराधिष्ठितं रथं वाहयन् श्मशानात् परिगृहीतनिजायुधो दुर्योधनादीन् सर्वान् विद्राव्य निवर्तते । ततः सूदरूपो भीमः सुतपरिष्वङ्गाभिलाषी हस्तेनैव रथादभिमन्युमवतार्य विराटसमीपमर्जुनसहित आनिन्ये । ततोऽभिमन्युस्तत्त्वापरिज्ञानेन भीमार्जुनौ शत्रुरिति विराटं चावजानन् ब्राह्मणरूपं युधिष्ठिरं परं प्रणतवान् । अथ सर्वमिदं शत्रुनिराकरणमुत्तरस्यैव कर्म मन्यमानाय विराटायोत्तरः समागत्य बृहन्नलावेषोऽयमर्जुन इति, अनेनैव दुर्योधनादयः सर्वे पराजिता इति च न्यवेदयत् । ततोऽर्जुने युधिष्ठिरादीनेव सर्वान् वेषप्रच्छन्नान् प्रकाश्य विजयशुल्कार्थं विराटेन दत्तामुत्तरां स्नुषार्थे परिगृह्णति धर्मराजविराटौ प्रमुदितावभिमन्युविवाहनिवेदनाय भीष्मादिसकाशमुत्तरं दूतं प्राहिणुताम् । भीष्मादिष्वप्यभिमन्युहरणं प्रति किञ्चिद् विमनाय्य शरेष्वर्जुनमामावलोक्य सर्वमिदमस्मदवमाननमर्जुनस्य कर्म, अभिमन्युश्च भीमेनैवापहृत इति निरूपयत्सु शकुनौ च तदप्रतिपद्यमाने सहसागत्योत्तरः प्रणतिपूर्वकं युधिष्ठिरसन्देशं यथावदाख्यातवान् । अथ दुर्योधनः पाण्डवेभ्योऽर्धराज्यदानमभ्युपजगाम, तेन च सर्वे प्रसन्ना बभूवुः ॥

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

पञ्चरात्रम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

* द्रोणः पृथिव्यर्जुनभीमदूतो
यः कर्णधारः शकुनीश्वरस्य ।
दुर्योधनो भी(म?ष्म)युधिष्ठिरः स
पायाद् विराडुत्तरगोऽभिमन्युः ॥ १ ॥

(परिक्रम्य) एवमार्यमिश्रान् विज्ञापयामि । अये किन्नु-खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

अहो कुरुराजस्य यज्ञसमृद्धिः ।

सूत्रधारः— भवतु, विज्ञातम् ।

---

* द्रोण इति । द्रोणः कृष्णवर्णः । पृथिव्यामर्जुनभीमयोर्दूतः । शकुनीश्वरस्य गरुडस्य कर्णधारो नेता । दुर्योधनः शत्रुभिरनभिगम्यत्वात् । भीष्मयुधिष्ठिरः भयङ्करश्च युद्धे स्थिरश्च । उत्तरं प्रशस्तं गच्छत्याचरतीति उत्तरगः । मन्युं यज्ञम् अभिगतोऽभिमन्युः । विराड् अर्थाच्छ्रीकृष्णः पायात् । अथच द्रोणादिशब्दैरेतद्रूपककथाविषयाणां द्रोणार्जुनभीमकर्णशकुनिदुर्योधनभीष्मयुधिष्ठिर-विराटोत्तर-गोभिमन्यूनां सूचनं मुद्रालङ्कारभङ्गभया कृतम् ।

सर्वैरन्तःपुरैः सार्धं प्रीत्या प्राप्तेषु राजसु ।
यज्ञो दुर्योधनस्यैष कुरुराजस्य वर्तते ॥ २ ॥

(निष्क्रान्तः)

स्थापना ।

(ततः प्रविशन्ति ब्राह्मणात्रयः)

सर्वे — अहो ! कुरुराजस्य यज्ञसमृद्धिः ।

प्रथमः — इह हि,

द्विजोच्छिष्टैरन्नैः प्रकुसुमितकाशा इव दिशो
हविर्धूमैः सर्वे हृतकुसुमगन्धास्तरुगणाः ।
मृगैस्तुल्या व्याघ्रा वधनिभृतसिंहाश्च गिरयो
नृपे दीक्षां प्राप्ते जगदपि समं दीक्षितमिव ॥ ३ ॥

द्वितीयः — सम्यग् भवानाह ।

तृप्तोऽग्निर्हविषामरोत्तममुखं* तृप्ता द्विजेन्द्रा धनै-
स्तृप्ताः पक्षिगणाश्च गोगणयुतास्तेते नराः सर्वशः ।
हृष्टं‡ सम्प्राति सर्वतो जगादिदं गर्जन्नृपे सद्गुणै-
रेवं लोकमुदारुरोह सकलं देवालयं तद्गुणैः ॥ ४ ॥

तृतीयः — इमेऽत्रभवन्तो द्विजातयः,

राज्ञां वेष्टनपट्टहृष्टचरणाः श्लाघ्यप्रभूतश्रवा¶
वार्द्धक्येऽप्यभिवर्धमाननियमाः स्वाध्यायशूरैर्मुखैः ।
विप्रा यान्ति वयःप्रकर्षशिथिला यष्टित्रिपादक्रमाः
शिष्यस्कन्धनिवेशिताञ्चितकरा जीर्णा गजेन्द्रा इव ॥ ५ ॥

---

* 'अग्निमुखा वै देवा.' इति श्रुते. । ‡ हृष्टमिति । एव नृपे सद्गुणैर्गर्जद् नृपगतान् सद्गुणान् कीर्तयत् । देवालयं देवावासभूतं सकल लोक तस्य नृपस्य जगतो वा गुणैः उदारुरोह अति शिश्ये । ¶ श्रवशब्दः ख्यातिवचनः ।

सर्वे — भोभो माणवकाः! भोभो माणवकाः! अनवसितेऽव-
भृथस्नाने न खलु तावदग्निरुत्सृष्टव्यो भवद्भिः ।

प्रथमः — हा धिग्, दर्शितमेव तावद् वटुचापलम्,

एषा दीप्तैक(यू)पा कनकमयभुजेवाभाति वसुधा
चैत्याग्निर्लौकिकाग्निं द्विज इव वृषलं पार्श्वे न सहते ।
नात्यर्थं प्लुष्टपृष्ठा हरितकुशतया वेदी परिवृता
प्राग्वंशं चैष धूमो गज इव नलिनीं फुल्लां प्रविशति ॥६॥

द्वितीयः — एवमेतद्,

अग्निरग्निभयादेष भीतैर्निर्वास्यते द्विजैः ।
कुले व्युत्क्रान्तचारित्रे ज्ञातिर्ज्ञातिभयादिव ॥ ७ ॥

तृतीयः —

शकटी च घृतापूर्णा सिच्यमानापि वारिणा ।
नारीवोपरतापत्या बालस्नेहेन दह्यते ॥ ८ ॥

प्रथमः — सम्यग् भवानाह,

एतां चक्रधरस्य* धर्मशकटीं दग्धुं समभ्युद्यतो
दर्भे शुष्यति नीलशाद्वलतया वह्निः शनैर्वामनः ।
वातेनाकुलितः शिखापरिगतश्चक्रं क्रमेणागतो
नेमीमण्डलमण्डलीकृतवपुः सूर्यायते पावकः ॥ ९ ॥

द्वितीयः — इदमपरं पश्य,

वल्मीकमूलाद् दहनेन भीता-
स्तत्कोटरैः पञ्च समं भुजङ्गाः ।

---

* राष्ट्रभर्तुर्दुर्योधनस्येत्यर्थः ।

समं विपन्नस्य नरस्य देहाद्
विनिःसृताः पञ्च यथेन्द्रियाणि ॥ १० ॥

तृतीयः — इदमपरं पश्येतां भवन्तौ,

दह्यमानस्य वृक्षस्य सानिलेन मखाग्निना ।
कोटरान्तरदेहस्थाः खगाः प्राणा इवोद्गताः ॥ ११ ॥

प्रथमः — एवमेतत्,

शुष्केणैकेन वृक्षेण वनं पुष्पितपादपम् ।
कुलं चारित्रहीनेन पुरुषेणेव दह्यते ॥ १२ ॥

वनं सवृक्षक्षुपगुल्ममेतत्
प्रकाममाहारमिवोपभुज्य ।
कुशानुसारेण हुताशनोऽसौ
नदीमुपस्प्रष्टुमिवावतीर्णः ॥ १३ ॥

द्वितीयः — एषएषः,

गतो वृक्षाद् वृक्षं विततकुशचीरेण दहनः
कदल्या विप्लुष्टं पतति परिणामादिव फलम् ।
असौ चाग्रे तालो मधुपटलचक्रेण महता
चिरं मूले दग्धः परशुरिव रुद्रस्य पतति ॥ १४ ॥

तृतीयः — हन्त सत्पुरुषरोष इव प्रशान्तो भगवान् हुताशनः ।

एतदग्नेर्बलं नष्टमिन्धनानां परिक्षयात् ।
दानशक्तिरिवार्यस्य विभवानां परिक्षयात् ॥ १५ ॥

प्रथमः —

स्रुग्भाण्डमरणीं दर्भानुपभुङ्क्ते हुताशनः ।
व्यसनित्वाच्चरः क्षीणः परिच्छदमिवात्मनः ॥ १६ ॥

द्वितीयः—

अवनतविटपो नदीपलाशः
पवनवशाच्चलितैकपर्णहस्तः ।
दवदहनविपन्नजीविताना-
मुदकमिवैष करोति पादपानाम् ॥ १७ ॥

तृतीयः— तदागम्यताम् । वयमपि तावदुपस्पृशामः ।

उभौ— बाढम् ।

(सर्वे उपस्पृश्य)

प्रथमः— अये अयमत्रभवता कुरुराजो दुर्योधनो भीष्म-द्रोणपुरःसरः सर्वराजमण्डलेनानुगम्यमान इत एवाभि-वर्तते । इमे हि,

यज्ञेन भोजय महीं जय विक्रमेण
रोषं परित्यज भव स्वजने दयावान् ।
इत्येवमागतकथामधुरं ब्रुवन्तः
कुर्वन्ति पाण्डवपरिग्रहमेव पौराः ॥ १८ ॥

तदागम्यताम् । वयमपि तावत् कुरुराजं सम्भावयामः ।

उभौ— बाढम् ।

सर्वे— जयतु भवान् जयतु । (निष्क्रान्ताः सर्वे)

विष्कम्भकः ।

(ततः प्रविशतो भीष्मद्रोणौ)

द्रोणः— धर्ममालम्बमानेन दुर्योधनेनाहमेवानुगृहीतो नाम ।

कुतः,

अतीत्य बन्धूनवलङ्घ्य* मित्रा-
प्याचार्यमागच्छति शिष्यदोषः ।
बालं ह्यपत्यं गुरवे प्रदातु-
र्नैवापराधोऽस्ति पितुर्न मातुः ॥ १९ ॥

भीष्मः — एष दुर्योधनः,

अवाप्य रूप्यग्रहणात् समुच्छ्रयं
रणप्रियत्वादयशो निपीतवान् ।
निषेव्य धर्मं सुकृतस्य भाजनं
स एव रूपेण चिरस्य शोभते ॥ २० ॥

(ततः प्रविशति दुर्योधनः कर्णः शकुनिश्च)

दुर्योधनः —

कृतश्रद्धो ह्यात्मा वहति परितोषं गुरुजनो
जगद् विश्वस्तं मे निवसति गुणो नष्टमयशः ।
मृतैः प्राप्यः स्वर्गो यदि कथय (भा)त्येतदनृतं
परोक्षो न स्वर्गो बहुगुणमि(है)वैष फलति ॥ २१ ॥

कर्णः — गान्धारीमातः‡ ! न्यायेनागतमर्थमतिसृजता न्याय्य-
मेव भवता कृतम् । कुतः,

बाणाधीना क्षत्रियाणां समृद्धिः
पुत्रापेक्षी वक्ष्यते सन्निधाता§ ।

---

* 'म्व्य' इत्यक्षरवदिदमक्षरमादर्शे भासते । ‡ गान्धारी माता यस्य, तस्य सम्बुद्धिर्गान्धारीमातरिति । "मातङ्मातृकमातृषु वा" इति वार्त्तिके बहुव्रीहौ ष्यङः सम्प्रसारण-विकल्पविधायके मातृकमातृशब्दयोर्निर्देशात् कपो वैकल्पिकत्वं बोद्धव्यम् । § सन्निधाता व्ययं विना धनस्य स्थापयिता ।

विप्रोत्सङ्गे वित्तमावर्ज्य सर्वं
राज्ञा देयं चापमात्रं सुतेभ्यः ॥ २२ ॥

शकुनिः — सम्यगाह गङ्गोपस्पर्शनाद् धौतकल्मषाङ्गोऽङ्गराजः ।

कर्णः —

इक्ष्वाकुशाय्यातिययातिराम-
मान्धातृनाभागनृगाम्बरीषाः ।
एते सकोशाः पुरुषाः सराष्ट्रा
नष्टाः शरीरैः क्रतुभिर्धरन्ते‡ ॥ २३ ॥

सर्वे — गान्धारीमातः ! यज्ञसमाप्त्या दिष्ट्या भवान् वर्धते ।

दुर्योधनः — अनुगृहीतोऽस्मि । भो आचार्य ! अभिवादये ।

द्रोणः — एह्येहि पुत्र ! अयमक्रमः ।

दुर्योधनः — अथ कः क्रमः ।

द्रोणः — किं न पश्यति भवान्,

दैवतं मानुषीभूतमेष तावन्नमस्यताम् ।
अ(न्ना?न्याया)चरणं सन्ये भीष्ममुत्क्रम्य वन्दितुम् ॥२४॥

भीष्मः — मा मा भवानेवम् । बहुभिः कारणैरपकृष्टोऽहं भवतः । कुतः,

अहं हि मात्रा जनितो भवान् स्वयं
ममायुधं वृत्तिरपह्नवस्तव ।
द्विजो भवान् क्षत्रियवंशजा वयं
गुरुर्भवान् शिष्यमहत्तरा वयं ॥ २५ ॥

द्रोणः — नोत्सहन्ते महात्मानो ह्यात्मानमपस्तोतुम् । एहि पुत्र !
अभिवादयस्व माम् ।

---

‡ धरन्ते म्रियन्ते जीवन्तीत्यर्थः । स्थितिवृत्तिरिह धातुः ।

दुर्योधनः — आचार्य! अभिवादये।

द्रोणः — एह्येहि पुत्र! एवमेवावभृथस्नानेषु खेदमवाप्नुहि।

दुर्योधनः — अनुगृहीतोऽस्मि। पितामह! अभिवादये।

भीष्मः — एह्येहि पौत्र! एवमेव ते बुद्धिप्रशमनं भवतु।

दुर्योधनः — अनुगृहीतोऽस्मि। मातुल! अभिवादये।

शकुनिः — वत्स!

एवमेव क्रतून् सर्वान् समानीयासदक्षिणान्।
राजसूये नृपान् जित्वा जरासन्ध इवानय ॥ २६ ॥

द्रोणः — अहो! आशीर्वचनेऽपि शकुनिरुद्योगं जनयति।
अहो! प्रियविरोधः खल्वयं क्षत्रियकुमारः।

दुर्योधनः — वयस्य! कर्ण! गुरुजनप्रणामावसाने प्राप्तक्रम-
मुपभुज्यतां वयस्यविस्रम्भः।

कर्णः — गान्धारीमातः!

क्रतुव्रतैस्ते तनु गात्रमेतत्
सोढुं बलं शक्ष्यसि पीडयानि।
अन्तस्त्वनामन्त्र्य न धर्षयामि
*राजर्षिधीराद् वचनाद् भयं मे ॥ २७ ॥

दुर्योधनः — एवमेव ते बुद्धिरस्तु।

द्रोणः — पुत्र! दुर्योधन! एष महेन्द्रप्रियसखो भीष्मको ना-
म भवन्तं सभाजयति।

---

* राजर्षिधीराद् राजर्ष्युचितधीरत्वयुक्तात्। वचनात् तृप्तिशान्तिसम्पद्वमणीयात् 'कृतश्रद्धो ह्यात्मे'त्यादिरूपात्।

दुर्योधनः — स्वागतमार्याय । अभिवादये ।

भीष्मः — पौत्र ! दुर्योधन ! एष दक्षिणापथपरिघभूतो भूरिश्र-
वा नाम भवन्तं सभाजयिष्यति ।

दुर्योधनः — स्वागतमार्याय ।

द्रोणः — पुत्र ! दुर्योधन ! भवतो यज्ञं सभाजयता वासुभद्रेण
प्रेषितोऽभिमन्युर्भवन्तं सभाजयति ।

शकुनिः — वत्स ! दुर्योधन ! एष जरासन्धपुत्रः सहदेवो भ-
वन्तमभिवादयति ।

दुर्योधनः — एह्येहि वत्स ! पितृसदृशपराक्रमो भव ।

सर्वे — एतत् सर्वराजमण्डलं भवन्तं सभाजयति ।

दुर्योधनः — अनुगृहीतोऽस्मि । भोः ! किन्नुखलु समागते स-
र्वराजमण्डले विराटो नागच्छति ।

शकुनिः — प्रेषितोऽस्य मया दूतः, शङ्के पथि वर्तत इति ।

दुर्योधनः — भो आचार्य ! धर्मे धनुषि चाचार्य ! प्रतिगृह्यतां
दक्षिणा ।

द्रोणः — दक्षिणेति । भवतुभवतु । व्यपश्र(मि!माय)ष्ये
तावद् भवन्तम् ।

दुर्योधनः — कथमाचार्योऽपि व्यपश्र(मि!माय)ष्यते ।

भीष्मः — भोः ! किन्नुखलु प्रयोजनं, यदा —

पीतः सोमो बाल्यदत्तो नियोगा-
च्छत्रच्छाया सेव्यते ख्यातिरस्ति ।
किं तद् द्रव्यं किं फलं को विशेषः
क्षत्राचार्यो यत्र विप्रो दरिद्रः ॥ २८ ॥

दुर्योधनः — आज्ञापयतु भवान् किमिच्छति । किमनुतिष्ठामि ।

द्रोणः — पुत्र ! दुर्योधन ! कथयामि ।

दुर्योधनः — किमिदानीं भवता विचार्यते,

प्राणाधिकोऽस्मि भवता च कृतोपदेशः
शूरेषु यामि गणनां कृतसाहसोऽस्मि ।
स्वच्छन्दतो वद किमिच्छसि किं ददानि
हस्ते स्थिता मम गदा भवतश्च सर्वम् ॥ २९ ॥

द्रोणः — पुत्र ! ब्रवीमि खलु तावत् । बाष्पवेगस्तु मां बाधते ।

सर्वे — कथमाचार्योऽपि बाष्पमुत्सृजति ।

भीष्मः — पौत्र ! दुर्योधन ! अफलस्ते परिश्रमः ।

दुर्योधनः — कोऽत्र ।

(प्रविश्य)

भटः — जयतु महाराजः ।

दुर्योधनः — आपस्तावत् ।

भटः — यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) जयतु महाराजः । इमा आपः ।

दुर्योधनः — आनय । (कलश गृहीत्वा) भो आचार्य ! अश्रुपातोच्छिष्टस्य क्रियतां शौचम् ।

द्रोणः — भवतुभवतु । मम कार्यक्रियैव मुखोदकमस्तु ।

दुर्योधनः — हा धिग्,

यदि विमृशसि पूर्वजिह्मतां मे
यदि च समर्थयसे न दास्यतीति ।

शरशतकठिनं प्रयच्छ हस्तं
सलिलमिदं करणं प्रतिग्रहाणाम् ॥ ३० ॥

द्रोणः — हन्त लब्धो मे हृदयविश्वासः । पुत्र ! श्रूयतां,
येषां गतिः क्वापि निराश्रयाणां
संवत्सरैर्द्वादशभिर्न दृष्टा ।
त्वं पाण्डवानां कुरु संविभाग-
मेषा च भिक्षा मम दक्षिणा च ॥ ३१ ॥

शकुनिः — (सोद्वेगम्) मा तावद् भोः !
उपन्यस्तस्य शिष्यस्य विश्वस्तस्य च गौरवे ।
य(द)प्रस्तुतमुत्पाद्य युक्तेयं धर्मवञ्चना ॥ ३२ ॥

द्रोणः — कथं धर्मवञ्चनेति । मा तावद् भो गान्धारविषयवि-
स्मित ! शकुने ! त्वदनार्यभावात् सर्वलोकमनार्यमिति
मन्यसे । हन्त भोः !
भ्रातॄणां पैतृकं राज्यं दीयतामिति वञ्चना ।
किं परं याचितैर्दत्तं बलात्कारेण तैर्हृतम् ॥ ३३ ॥

सर्वे — कथं बलात्कारेण नाम ।

भीष्मः — पौत्र! दुर्योधन! *अवभृथस्नानमात्रमेव खलु
तावत् । मित्रमुखस्य शत्रोः शकुनेर्वचनं न श्रोतव्यम् ।
पश्य पौत्र !
यत् पाण्डवा द्रुपदराजसुतासहायाः
कान्तारेणुपरुषाः पृथिवीं भ्रमन्ति ।

---

* न पुनर्द्यूतमिदानीं वर्तत इत्यर्थः ।

(त?य)त् त्वं च तेषु विमुखस्त्वयि ते च वामा-
स्तत् सर्वमेव शकुनेः परुषावलेपः ॥ ३४ ॥

दुर्योधनः — भवतु, एवं तावदाचार्य ! पृच्छामि ।

द्रोणः — पुत्र ! कथय ।

दुर्योधनः —

यत् पुरा ते सभामध्ये राज्ये माने च धर्षिताः ।
बलात्कारसमर्थैस्तैः किं रोषो धारितस्तदा ॥ ३५ ॥

द्रोणः — अत्रेदानीं धर्मच्छलेन वञ्चितो द्यूताश्रयवृत्तिर्युधिष्ठिरः
प्रष्टव्यः,
येन भीमः सभास्तम्भं तुलयन्नेव वारितः ।
यद्येकस्मिन् विमुक्तः स्यान्नास्माञ्छकुनिराक्षिपेत् ॥ ३६ ॥

भीष्मः — अन्यत् प्रस्तुतमन्यदापतितम् । भो आचार्य ! कार्यमत्र गुरुतरं, न कलहः ।

द्रोणः — मात्र क(र्द?दर्थ)नं कार्यं, कलह एव भवतु ।

भीष्मः — प्रसीदत्वाचार्यः । पश्य पौत्र !

ये दुर्बलाश्च कृपणाश्च निराश्रयाश्च
त्वत्तश्च (शर्म) मृगयन्ति न गर्वयन्ति ।
ज्येष्ठो भवान् प्रणयिनस्त्वयि ते कुटुम्बे
तान् धारयिष्यसि[§] मृगैः सह वर्तयन्तु ॥ ३७ ॥

शकुनिः — वर्तयन्तुवर्तयन्तु ।

---

§ धारयिष्यसि, वर्तयन्तु इत्युभयत्रापि प्रश्नकाकुः । तथाच तान् कुटुम्बे स्वीयत्वेन किं ग्रहीष्यसि, किं वा त्वयोपेक्षितास्ते मृगैः सह वने वृत्तिमाश्रयन्तां इति प्रश्नार्थः ।

कर्णः — भो आचार्य ! अलममर्षेण । दुर्योधनो हि नाम,

हितमपि परुषार्थं रुष्यति श्राव्यमाणो
वरपुरुषविशेषं नेच्छति स्तूयमानम् ।
गतमिदमवसानं रक्ष्यतां शिष्यकार्यं
गज इव बहुदोषो मार्दवेनैव वाह्यः ॥ ३८ ॥

द्रोणः — वत्स ! कर्ण ! तेजस्वि ब्राह्मण्यम् । काले सम्बोधितोऽस्मि । एषोऽहं भवच्छन्दमनुवर्ते । पुत्र ! दुर्योधन ! अहं तव प्रभावी ननु ।

भीष्मः — एष इदानीं मार्गेणारब्धः । सान्त्वं हि नाम दुर्विनीतानामौषधम् * ।

दुर्योधनः — न ममैव, कुलस्यापि मे भवान् प्रभुः ।

द्रोणः — एतत् तवैव युक्तम् । तत् पुत्र !

त्वं वञ्च्यसे यदि मया न तवात्र दोष-
स्त्वां पीडयामि यदि वास्तु तवैष लाभः ।
भेदाः परस्परगता हि महाकुलानां
धर्माधिकारवचनेषु शमीभवन्ति ॥ ३९ ॥

दुर्योधनः — तेन हि समर्थयितुमिच्छामि ।

द्रोणः — पुत्र ! केन समर्थयितुमिच्छसि ।

भीष्मेण कर्णेन कृपेण केन
किं सिन्धुराजेन जयद्रथेन ।
किं द्रौणिनाहो विदुरेण सार्धं
पित्रा स्वमात्रा वद पुत्र ! केन ॥ ४० ॥

दुर्योधनः — नहि नहि, मातुलेन ।

---

* वाक्यादौ '(स्वगतम्)' इत्यपेक्षितम् ।

द्रोणः — शकुनिना । *हन्त विपन्नं कार्यम् ।

दुर्योधनः — मातुल ! इतस्तावत् । वयस्य ! कर्ण ! इतस्तावत् ।

द्रोणः — *भवतु, एवं तावत् करिष्ये । +वत्स ! गान्धारराज ! इतस्तावत् ।

शकुनिः — अयमस्मि ।

द्रोणः — वत्स !

क्रोधप्रायं वयो जीर्णं क्षन्तव्यं वदुचापलम् ।
अस्य रूक्षस्य वचसः परिष्वङ्गः शमीक्रिया ॥ ४१ ॥

भीष्मः — (आत्मगतम्)

एष शिष्यस्य वात्सल्याच्छकुनिं याचते गुरुः ।
एवं सान्त्वीकृतो ह्येष नैव मुञ्चति जिह्मताम् ॥ ४२ ॥

शकुनिः — (आत्मगतम्) अहो शठः खल्वाचार्यः स्वकार्यलोभान्मां सान्त्वयति ।

(सर्वे परिक्रम्योपविशन्ति)

दुर्योधनः — मातुल ! पाण्डवानां राज्यार्धं प्रति को निश्चयः ।

शकुनिः — न दातव्यमिति मे निश्चयः ।

दुर्योधनः — दातव्यमिति वक्तुमर्हति मातुलः ।

शकुनिः — यदि दातव्ये राज्ये किमस्माभिः सह मन्त्रयसे । ननु सर्वमेव प्रदीयताम् ।

दुर्योधनः — वयस्य ! अङ्गराज ! भवानिदानीं न किञ्चिदाह ।

कर्णः — इदानीं किमभिधास्यामि ,

रामेण भुक्तां परिपालितां च
सुभ्रातृतां न प्रतिषेधयामि ।

---

* '(स्वगतम्)' इत्यपेक्षितम् । + '(प्रकाशम्)' इत्यपेक्षितम् ।

क्षमाक्षमत्वे तु भवान् प्रमाणं
सङ्ग्रामकालेषु वयं सहायाः ॥ ४३ ॥

दुर्योधनः — मातुल! बलवत्प्रत्यमित्रोऽनुपजीव्यश्च काश्चित् कुदेशश्चिन्त्यताम्। तत्र वसेयुः पाण्डवाः।

शकुनिः — हन्त भोः!

शून्यमित्यभिधास्यामि कः पार्थाद् बलवत्तरः।
ऊषरेष्वपि सस्यं स्याद् यत्र राजा युधिष्ठिरः ॥ ४४ ॥

दुर्योधनः — अथेदानीं,

गुरुकरतलमध्ये तोयमावर्जितं मे
श्रुतमिह कुलवृद्धैर्यत् प्रमाणं पृथिव्याम्।
तदिदमपनयो वा वञ्चना वा यथा वा
भवतु नृप! जलं तत् सत्यमिच्छामि कर्तुम्॥ ४५॥

शकुनिः — अनृतवचनान्मोचयितव्यो भवान् ननु।

दुर्योधनः — अथकिम्।

शकुनिः — तेन हि इतस्तावत्। (उपसृत्य) भो आचार्य! इहात्रभवान् कुरुराजो भवन्तं विज्ञापयति।

द्रोणः — वत्स! गान्धारराज! अभिधीयताम्।

शकुनिः — यदि पञ्चरात्रेण पाण्डवानां प्रवृत्तिरुपनेतव्या, राज्यस्यार्धं प्रदास्यति किल। समानयतु भवानिदानीम्।

द्रोणः — मा तावद् भोः!

(यैः?ये) कर्तुकामैश्छलनं भवद्भिः
संवत्सरैर्द्वादशभिर्न दृष्टाः।

ते पञ्चरात्रेण मयोपनेया
वरं ह्यदत्तं विशदाक्षरेण ॥ ४६ ॥

भीष्मः — पौत्र! दुर्योधन! अच्छलो धर्मः। वयमपि तावदस्मिन्नर्थे प्रीताः स्मः। पश्य पौत्र!

वर्षेण वा वर्षशतेन तेषां
त्वं पाण्डवानां कुरु संविभागम्।
तस्मात् प्रतिज्ञां कुरु वीर! सत्यां
सत्या प्रतिज्ञा हि सदा कुरूणाम् ॥ ४७ ॥

दुर्योधनः — एष एव मे निश्चयः।

द्रोणः — (आत्मगतम्)

अद्य मे कार्यलोभेन हनूमत्त्वं गता स्पृहा।
लङ्घयित्वार्णवं येन नष्टा सीता निवेदिता ॥ ४८ ॥
तत् कुतोनुखलु पाण्डवानां प्रवृत्तिरुपनेतव्या।

(प्रविश्य)

भटः — जयतु महाराजः। विराटनगराद् दूतः प्राप्तः।

सर्वे — शीघ्रं प्रवेश्यताम्।

भटः — यदाज्ञापयथ। (निष्क्रान्तः)

(प्रविश्य)

दूतः — जयतु महाराजः।

सर्वे — किमागतो विराटेश्वरः।

भटः — विषादेनावृतो नोपगच्छति, यत्तत्सम्बन्धि सन्निकृष्टं कीचकानां भ्रातृशतं,

रात्रौ छद्मेन केनापि बाहुभ्यामेव हिंसितम् ।
दृश्यते हि शरीराणामशस्त्रजनितो वधः ॥ ४९ ॥

इति ।

भीष्मः — कथमशस्त्रेणेति । *भो आचार्य! अभ्युपगम्यतां पञ्चरात्रम् ।

द्रोणः — किमर्थम् ।

भीष्मः —

भीमसेनस्य लीलैषा सुव्यक्तं बाहुशालिनः ।
योऽस्मिन् भ्रातृशते रोषः स तस्मिन् फलितः शते ॥ ५० ॥

द्रोणः — कथं भवान् जानाति ।

भीष्मः —

कथं पण्डित! कूलेषु भ्रान्तानां बालचापलम् ।
नाभिजानन्ति वत्सानां शृङ्गस्थानानि गोवृषाः ॥ ५१ ॥

द्रोणः — गोवृषा इति । हन्त सिद्धं कार्यम् । ‡पुत्र! दुर्योधन! अस्तु पञ्चरात्रम् ।

दुर्योधनः — अथकिम् ।

द्रोणः — भोभो यज्ञमनुभवितुमागता राजानः! शृण्वन्तुशृण्वन्तु भवन्तः । इहात्रभवान् कुरुराजो दुर्योधनः, न, न, मातुलसहितः यदि पाण्डवानां प्रवृत्तिरुपनेतव्या, राज्यस्यार्धं प्रदास्यति किल । ननु पुत्र!

दुर्योधनः — अथकिम् ।

द्रोणः — एतद् द्विस्त्रिः सम्प्रधार्यताम् ।

शकुनिः — काले ज्ञास्यामि ।

---

* '(जनान्तिकम्)' इत्यपेक्षितम् । ‡ '(प्रकाशम्)' इत्यपेक्षितम् ।

द्रोणः — ननु गाङ्गेय !

भीष्मः — (आत्मगतम्)

आचार्यस्य यदा हर्षो धैर्यमुत्क्रम्य सूचितः ।
शङ्के दुर्योधनेनैष वञ्च्यमानेन वञ्चितः ॥ ५२ ॥

(प्रकाशम्) पौत्र ! दुर्योधन ! अस्ति मम विराटेनाप्रकाशं वैरम्, अथ भवतो यज्ञमनुभवितुमनागत इति । तस्मात् क्रियतां तस्य गोग्रहणम् । ‡ब्राह्मणार्जवबुद्धे !

धर्षिता रथशब्देन रोषमेष्यन्ति पाण्डवाः ।
अस्ति तेषां कृतज्ञत्वमिष्टं गोग्रहणे स्थितम् ॥ ५३ ॥

(प्रविश्य)

भटः — *सज्जाः खलु रथा वाहाः प्रवेशाभिमुखाय ते ।

दुर्योधनः —

एभिरेव रथैः शीघ्रं क्रियतां तस्य गोग्रहः ।
गदा यज्ञप्रशान्ता च पुनर्मे करमेष्यति ॥ ५४ ॥

द्रोणः —

तस्मान्मे रथमानयन्तु पुरुषाः,

शकुनिः —

हस्ती ममानीयतां,

कर्णः —

भारार्थं भृशमुद्यतैरिह हयैर्युक्तो रथः स्थाप्यताम् ।

भीष्मः —

बुद्धिर्मे त्वरते विराटनगरं गन्तुं धनुस्त्वर्यतां

सर्वे —

मुक्त्वा चापमिहैव तिष्ठतु भवानाज्ञाविधेया वयम् ॥ ५५ ॥

---

‡ '(जनान्तिकम्)' इत्यपेक्षितम् । * पद्यगन्धीद वाक्य स्यात् ।

द्रोणः — पुत्र ! दुर्योधन ! आवां तव युद्धे पराक्रमं द्रष्टुमिच्छावः ।

दुर्योधनः — यदभिरुचितं भवते ।

द्रोणः — वत्स ! गान्धारराज ! अस्मिन् गोग्रहणे तव खलु प्रथमरथः ।

शकुनिः — बाढम् । प्रथमः कल्पः ।

(निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति वृद्धगोपालकः)

वृद्धगोपालकः — (क) **गावो मे अहीणवच्छा होन्तु । अविहवा अ गोवजुवदीओ होन्तु। णो ळाआ विळाडो एक्कच्छत्तप्पुहुवीपदी होदु । महाळाअष्ष विळाडश्श वष्षवड्ढणगोप्पदाणणिमित्तं इमष्षिं णअळोववणवीहीए आअन्तुं गोधणं षव्वे च किदमङ्गळमोदआ गोवदाळआ दाळिआ अ दाव । एषु ज्जेष्ठं* गच्छिअ अणुभविष्षम् ।** (विलोक्य) **किण्णुहु एषो वाअषो षुक्खळुक्खं आळुहिअ षुक्खषाखाणिघट्टिअतुण्डं आदिच्चाहिमुहं विष्षळं विळवदिं । षन्ती होदु षन्ती होदु अह्माणं गोधणष्ष अ । जाव एषु ज्जेष्ठं गच्छिअ गोवदाळआणं दाळिआणं वाहळामि । गोमित्तअ ! गोमित्तअ !**

(क) गावो मेऽहीनवत्सा भवन्तु । अविधवाश्च गोपयुवतयो भवन्तु । अस्माकं राजा विराट एकच्छत्रपृथिवीपतिर्भवतु । महाराजस्य विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्यामायान्तु गोधनं सर्वे च कृतमङ्गलमोदका गोपदारका दारिकाश्च तावत् । एषु ज्यैष्ठचं गत्वानुभविष्यामि । किंनुखल्वेष वायसः शुष्कवृक्षमारुह्य शुष्कशाखानिघट्टितुण्डमादित्याभिमुखं विस्वरं विलपति । शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य च । यावदेषु ज्यैष्ठचं गत्वा गोपदारकाणां दारिकाणां व्याहरामि । गोमित्रक ! गोमित्रक !

---

* 'ज्येष्ठ' इति स्यात् ।

(प्रविश्य)

गोमित्रकः — (क) मातुळ ! वन्दामि ।

वृद्धगोपालकः—(ख)षन्ती होदु षन्ती होदु अह्माअं गोधणष्ष अ। अळे गोमित्तअ ! महाळाजष्ष विळाडरश वष्षवड्ढण-गोप्पदाणणिमित्तं इमष्सिं णअळोववणवीहीए आअन्तुं गोधणं षव्वे च किदमङ्गळमोदआ गोवदाळआ दाळि-आ अ। अळे गोमित्तअ ! गोवदाळआणं दाळिआणं वाहळ ।

गोमित्रकः — (ग) जं मादुळो आणवेदि । गोळक्खिणिए ! घिदपिण्ड ! षामिणि ! वषभदत्त ! कुम्भदत्त ! महिषदत्त ! आअच्छहआअच्छह सिग्घं ।

(ततः प्रविशन्ति सर्वे)

सर्वे — (घ) मादुळ ! वन्दामो ।

वृद्धगोपालकः — (ङ) षन्ती होदु षन्ती होदु अह्माणं गोव-

(क) मातुल ! वन्दे ।

(ख) शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य च । अरे गोमित्रक ! महाराजस्य विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्यामायान्तु गोधनं सर्वे च कृतमङ्गलमोदका गोपदारका दारिकाश्च । अरे गोमित्रक ! गोपदारकाणां दारिकाणां व्याहर ।

(ग) यन्मातुल आज्ञापयति । गोरक्षिणिके ! घृतपिण्ड ! स्वामिनि ! वृषभदत्त ! कुम्भदत्त ! महिषदत्त ! आगच्छतागच्छत शीघ्रम् ।

(घ) मातुल ! वन्दामहे ।

(ङ) शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोपदारकाणां दारिकाणां च । महाराजस्य

दाळआणं दाळिआणं (अ)। महाळाअष्ष विळाडष्ष वष्ष-
वड्ढणगोप्पदाणणिमित्तं इमष्णिं णअळोववणवीहीए
आअन्तुं गोधणं। तत्तअं वेळं गाअन्तो णच्चन्तो होम ।

सर्वे — (क) जं मादुळो आणवेदि । (सर्वे नृत्यन्ति)

वृद्धगोपालकः — (ख) हीही षुट्ठु णच्चिदम्, षुट्ठु गाइदं ।
जाव अहं पि णच्चेमि ।

सर्वे — (ग) हाहा मादुळ! अदिमहन्तं ळेणुं उप्पदिदो ।

वृद्धगोपालकः — (घ) ण हु ळेणुं एव्व, षंक्खुदुन्दुभिघोषं ।
उप्पदिदो ।

सर्वे — (ङ) दिवाचन्दप्पभापण्डुळजोल्हाव(गु)ण्ठिदो षुदमण्डळुं
षुज्यो अत्थि अ णत्थि अ ।

गोमित्रकः — (च) हाहा मादुळ! एदे के वि मणुष्षा दहि-
पिण्डपण्डरेहि छत्तेहि घोडअषअडिअं आळुहिअ षव्वं
घोषुं विद्दवन्ति चोळा ।

विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्यामायातु गोधनम्। तावतीं वेलां गायन्तो नृत्यन्तो भवामः ।

(क) यन्मातुल आज्ञापयति ।

(ख) हीही सुष्ठु नर्तितं, सुष्ठु गीतं, यावदहमपि नृत्यामि ।

(ग) हाहा मातुल! अतिमहान् रेणुरुत्पतितः ।

(घ) न खलु रेणुरेव, शङ्खदुन्दुभिघोष उत्पतितः ।

(ङ) दिवाचन्द्रप्रभापाण्डुरज्योत्स्नावगुण्ठितः शतमण्डलः सूर्योऽस्ति च नास्ति च ।

(च) हाहा मातुल! एते केऽपि मनुष्या दधिपिण्डपाण्डुरैश्छत्रैर्घोटकशकटिकामारुह्य सर्वे घोषं विद्रवन्ति चोराः ।

वृद्धगोपालकः — (क) हीही षरषंपादा उट्ठिदा । दारआ! दाळिआ! षिग्घं पक्कणं पविषह ।

सर्वे — (ख) जं मादुळो आणवेदि । (निष्क्रान्ताः)

वृद्धगोपालकः — (ग) हाहा चिट्ठहचिट्ठह । पहरहपहरह । गह्णह-गह्णह । इमं वुत्तन्तं महाळाअविळाडश्श णिवेदइष्षामो ।

(निष्क्रान्तः)

प्रवेशकः ।

(ततः प्रविशति भटः)

भटः — भोभो निवेद्यतांनिवेद्यतां महाराजाय विराटेश्वराय— एता हि दस्युकर्मप्रच्छन्नविक्रमैर्धार्तराष्ट्रैर्ह्रियन्ते गाव इति । तत्र हि,

द्रुतैश्च वत्सैर्व्यथितैश्च गोगणै-
निरीक्षणत्रस्तमुखैश्च गोवृषैः ।
कृतार्तनादाकुलितं समन्ततो
गवां कुलं शोच्यमिहाकुलाकुलम् ॥ १ ॥

इति ।

(नेपथ्ये)

किं धार्तराष्ट्रैरिति ।

भटः — आर्य! अथकिम् ।

(प्रविश्य)

काञ्चुकीयः — सदृशमेतद् भ्रातृजनेष्वपि द्रोहिणाम् ।

(क) हीही शरसंपाता उत्थिताः । दारकाः! दारिकाः! शीघ्रं पक्कणं प्रविशत ।

(ख) यन्मातुल आज्ञापयति ।

(ग) हाहा तिष्ठततिष्ठत । प्रहरतप्रहरत । गृह्णीतगृह्णीत । इमं वृत्तान्तं महाराज-विराटाय निवेदयिष्यामः ।

सज्जैश्चापैर्बद्धगोधाङ्गुलित्रा
वर्मच्छन्नाः कल्पितस्यन्दनस्थाः ।
वीर्योत्सिक्ता युद्धसज्जाः कृतास्त्रा
राज्ञो वैरं गोषु निर्यातयन्ति ॥ २ ॥

जयसेन ! जन्मनक्षत्रक्रियाव्यापृतस्य महाराजस्य तावदकालनिवेदनं मन्युमुत्पादयति । तस्मात् पुण्याहावसाने निवेदयिष्ये ।

भटः—आर्य ! अतिपाति कार्यमिदं, शीघ्रं निवेद्यताम् ।

काञ्चुकीयः—इदं निवेद्यते ।

(ततः प्रविशति राजा)

राजा—
मा तावद् व्यथितविकीर्णबालवत्सा
गावो मे रथरवशङ्क्या ह्रियन्ते ।
पीनांसश्चलवलयः सचन्दनार्द्रो
निर्लज्जो मम च करः कराणि* भुङ्क्ते ॥ ३ ॥

जयसेन ! जयसेन !

(प्रविश्य)

भटः—जयतुजयतु महाराजः ।

राजा—अलं महाराजशब्देन । अवधूतं मे क्षत्रियत्वम् ।
उच्यतां रणविस्तरः ।

---

* कराणि अन्नविशेषान् । 'भिस्सा स्त्री दीदिविर्नं षण् । पुन्नपुसकयोश्चोरं करमाहार्यमित्यपि' इति वैजयन्ती ।

भटः—न विस्तरार्हाणि विप्रियाणि । एष समासः,

एकवर्णेषु गात्रेषु गवां स्यन्दनरेणुना ।
कशापातेषु दृश्यन्ते नानावर्णविभक्तयः ॥ ४ ॥

राजा— तेन हि,

धनुरुपनय शीघ्रं कल्प्यतां स्यन्दनो मे
मम गतिमनुयातुच्छन्दतो यस्य भक्तिः ।
रणशिरसि गवार्थे नास्ति मोघः प्रयत्नो
निधनमपि यशः स्यान्मोक्षयि(त्वा) तु धर्मः ॥ ५ ॥

भटः— यदाज्ञापयति महाराजः । (निष्क्रान्तः)

राजा— भोः! किन्नुखलु दुर्योधनस्य सामन्तरेण वैरम् । आ यज्ञमनुभवितुमनागत इति । कथमनुभवामि । कीचकानां विनाशेन वयमुच्चीतसन्तापाः संवृत्ताः । अथवा परोक्षमपि पाण्डवानां स्निग्ध इति सर्वथा योद्धव्यम् । हस्तिनपुरनिवासाच्छीलज्ञो भगवान् दुर्योधनस्य । अथवा,

कामं दुर्योधनस्यैष न दोषमभिधास्यति ।
अर्थित्वादपरिश्रान्तः पृच्छत्येव हि कार्यवान् ॥ ६ ॥

कोऽत्र ।

(प्रविश्य)

भटः— जयतु महाराजः ।

राजा— भगवांस्तावदाहूयताम् ।

भटः— यदाज्ञापयति महाराजः । (निष्क्रान्तः)

(ततः प्रविशति भगवान्)

भगवान्— (सर्वतो विलोक्य) भोः! किन्नुखल्विदम् ।

गजेन्द्राः कल्प्यन्ते तुरगपतयो वर्मरचिताः
रथाः सानूकर्षाः* कृतपरिकरा योधपुरुषाः ।
समुद्योगं दृष्ट्वा भयमननुभूतं स्पृशति मां
$न खल्वात्मन्यस्तं कृतमतिरहं ते तु चपलाः ॥ ७ ॥

राजा — जयतु भगवान् जयतु । विराटो भगवन्! अभिवादये ।

भगवान् — स्वस्ति ।

विराटः — भगवन्! एतदासनमास्यताम् ।

भगवान् — (उपविश्य) भो राजन्!

उद्योगः प्रस्तुतः कस्माच्छ्रीर्नं सन्तोषमिच्छति ।
पीडयिष्यति सोत्सेकान् पीडितान् मोक्षयिष्यति ॥ ८ ॥

राजा — भगवन्! गोग्रहणादवमानितोऽस्मि ।

भगवान् — केन कारणेन ।

राजा — धार्तराष्ट्रैः ।

भगवान् — (आत्मगतम्) भोः कष्टम्,

एकोदकत्वं खलु नाम लोके
मनस्विनां कम्पयते मनांसि ।
वैरप्रियैस्तैर्हि कृतेऽपराधे
यत्सत्यमस्माभिरिवापराद्धम् ॥ ९ ॥

---

* अनुकर्षो रथस्याधोधरणदारु तेन सहिताः । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. ११२) इति दीर्घः ।

$ न खल्वात्मविषयकं मे किञ्चिद् भयं, यतोऽहमचपलबुद्धिः । ते तु मम भ्रातरश्चपला युद्धकण्डूलत्वात् कदाचिद् युद्धसंरम्भेण स्वात्मानं प्रकाशयेयुरिति तदाश्रयं मे भयमस्तीति भावः ।

विराटः — भगवन्! किमिदानीं विचार्यते।

भगवान् — न खलु किञ्चित्। तेषामुत्सुकः।

राजा — अद्यप्रभृति निभृता भविष्यन्ति। यदि शक्तोऽपि युधिष्ठिरो मर्षयति, अहं न मर्षयामि।

भगवान् — (आत्मगतम्)

अद्येदानीं पर्णशय्या (च) भूमौ
राज्यभ्रंशो द्रौपदीधर्षणं वा।
वेषान्यत्वं संश्रितानां निवासः
सर्वं श्लाघ्यं यत् क्षमा ज्ञायते मे॥ १०॥

(प्रविश्य)

भटः — जयतु महाराजः।

राजा — अथ किं चेष्टते दुर्योधनः।

भटः — न खलु दुर्योधन एव, पृथिव्यां राजानः सर्वे प्राप्ताः।

द्रोणश्च भीष्मश्च जयद्रथश्च
शल्योऽङ्गराजः शकुनिः कृपश्च।
तेषां रथोत्कम्पचलत्पताकै-
र्भग्ना ध्वजैरेव वयं न बाणैः॥ ११॥

राजा — (उत्थाय कृताञ्जलिः) कथं तत्रभवान् गाङ्गेयोऽपि प्राप्तः।

भगवान् — साधु धर्षितेनापि नातिक्रान्तः समुदाचारः।

[(आत्मगतम्)] भोः,

किमर्थं खलु सम्प्राप्तः कुरूणां गुरुरुत्तमः।
शङ्के तीर्णा प्रतिज्ञेति स्मारणं क्रियते मम॥ १२॥

*(प्रकाशम्)

राजा — कोऽत्र ।

(प्रविश्य)

भटः — जयतु महाराजः ।

विराटः — सूतस्तावदाह्वयताम् ।

भटः — यदाज्ञापयति महाराजः । (निष्क्रान्तः)

(प्रविश्य)

सूतः — जयत्वायुष्मान् ।

विराटः —

रथमानय शीघ्रं मे श्लाघ्यः प्राप्तो रणातिथिः ।
तोषयिष्ये शरैर्भीष्मं जेष्यामीत्यमनोरथः ॥ १३ ॥

सूतः — यदाज्ञापयत्यायुष्मान् । आयुष्मन्!

रिपूणां सैन्यभेदेषु यस्ते परिचितो रथः ।
रथचर्यां बहिष्कर्तुं तमास्थायोत्तरो गतः ॥ १४ ॥

विराटः — कथं निर्यातः कुमारः ।

भगवान् — भो राजन्! संवार्यतां संवार्यतां कुमारः ।

अगणितगुणदोषो युद्धतीक्ष्णश्च बाल्या-
न्न च दहति न कश्चित् सन्निकृष्टो रणाग्निः ।
अथच परिहरन्ते धार्तराष्ट्रा न किञ्चि-
न्न खलु परिभवात् ते युद्धदोषान् ब्रवीमि ॥ १५ ॥

राजा — तेन हि शीघ्रमन्यो रथः कल्प्यताम् ।

सूतः — यदाज्ञापयत्यायुष्मान् ।

राजा — अथवा एहि तावत् ।

सूतः — आयुष्मन्! अयमस्मि ।

---

* अत्र कतिपयवाक्यभ्रंश इव भाति ।

राजा —

त्वमिदानीं कुमारस्य किं न वाहितवान् रथम् ।
अनुज्ञातोऽसि किं तेन न राज्ञां सारथिर्भवान् ॥ १६ ॥

सूतः — प्रसीदत्वायुष्मान् । रथं (सं?)कल्पयित्वा तु सूतसमुदा-
चारेणोपस्थितः खल्वहम् । कुमारेण,

किन्नु तत्परिहासार्थं किन्नु तत्रास्ति कौशलम् ।
मामतिक्रम्य सारथ्ये विनियुक्ता बृहन्नला ॥ १७ ॥

भगवान् — राजन्! अलमलं सम्भ्रमेण ।

यदि स्वचक्रोद्धतरेणुदुर्दिनं
रथं समास्थाय गता बृहन्नला ।
परान् क्षणैर्नेमिरवैर्निवारयन्
विनापि बाणान् रथ एव जेष्यति ॥ १८ ॥

राजा — तेन हि शीघ्रमन्यो रथः कल्प्यताम् ।

सूतः — यदाज्ञापयत्यायुष्मान् । (निष्क्रान्तः)

(प्रविश्य)

भटः — भग्नः खलु कुमारस्य रथः ।

राजा — कथं भग्नो नाम ।

भटः — श्रोतुमर्हति महाराजः ।

बहुभिः समराभिज्ञैराच्छिन्नोऽश्वपथः परैः ।
भग्नो (वा)हनलोभेन श्मशानाभिमुखो रथः ॥ १९ ॥

भगवान् — (आत्मगतम्) आः अत्र खलु गाण्डीवम् । (प्रकाशम्)
भो राजन्!

निमित्तं किञ्चिदुत्पन्नं श्मशानाभिमुखे रथे ।
धार्तराष्ट्राः स्थिता यत्र श्मशानं तद् भविष्यति ॥ २० ॥

राजा — भगवन्! अकाले स्वस्थवाक्यं मन्युमुत्पादयति ।

भगवान् — अलं मन्युना । कदाचिदनृतं नोक्तपूर्वम् ।

राजा — आ अस्त्येतत् । गच्छ भूयो ज्ञायतां वृत्तान्तः ।

भटः — यदाज्ञापयति(आयुष्मान्? महाराजः)। (निष्क्रान्तः)

राजा —

को नु खल्वेष सहसा कम्पयन्निव मेदिनीम् ।
(*गादिस्रोत इवाविद्धो?) क्षणात् संवर्तते ध्वनिः ॥ २१ ॥

ज्ञायतां शब्दः ।

(प्रविश्य)

भटः — जयतु महाराजः। श्मशानान्मुहूर्तविश्रान्ततुरगेण कुमारेण तु ।

भगवान् — एष मामनृतवादिनं न कुर्यात् ।

भटः —

कृता नीला नागाः शरशतनिपातेन कपिला
हयो वा योधो वा न वहति न कश्चिच्छरशतम् ।
शरैः स्तम्भीभूताः शरपरिकराः स्यन्दनवराः
शरैश्छन्ना मार्गाः स्रवति¶ धनुरुग्रां शरनदीम् ॥ २२ ॥

भगवान् — (आत्मगतम्)

---

* 'स्यदि स्रोत इवाविद्धम्' इति स्यात् । ¶ अन्तर्भावितण्यर्थोऽत्र स्रवतिः ।

एतदक्षयतूणीत्वं येन शक्रस्य खाण्डवे ।
यावत्यः पतिता धारास्तावन्तः प्रेषिताः शराः ॥ २३ ॥

राजा — अथ परेष्विदानीं को वृत्तान्तः ।

भटः — अप्रत्यक्षं हि तत्र मे । प्रवृत्तिपुरुषाः कथयन्ति—

धनुर्घोषं द्रोणस्तदिदमिति बुद्ध्वा प्रतिगतः
स्वजे बाणं दृष्ट्वा कृतमिति न भीष्मः प्रहरति ।
शरैर्भिन्नः कर्णः किमिदमिति चान्ये नृपतयो
भयेऽप्येको बाल्यान्न भयमभिमन्युर्गणयति ॥ २४ ॥

भगवान् — कथमभिमन्युः प्राप्तः । भो राजन्!

युध्यते यदि सौभद्रस्तेजोभिर्वंशयोर्द्वयोः ।
सारथिः प्रेष्यतामन्यो विक्लबात्र बृहन्नला ॥ २५ ॥

राजा — मा मा भवानेवम् ।

भीष्मं रामशरैरभिन्नकवचं द्रोणं च मन्त्रायुधं
कृत्वा कर्णजयद्रथौ च विमुखौ शेषांश्च तांस्तान् नृपान् ।
सौभद्रं स्वशरैर्न धर्षयति किं भीतः पितुः प्रत्ययात्
संसृष्टोऽपि वयस्यभावसदृशं तुल्यं वयो रक्षति ॥ २६ ॥

भटः — एष खलु कुमारस्य रथः,

आलम्बितो भ्रमति धावति तेन मुक्तो
न प्राप्य धर्षयति नेच्छति विप्रकर्तुं(ः?म्) ।
आसन्नभूमिचपलः परिवर्तमानो
योग्योपदेशमिव तस्य रथः करोति ॥ २७ ॥

राजा — गच्छ । भूयो ज्ञायतां वृत्तान्तः ।

भटः—यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। जयतु विराटेश्वरः। प्रियं निवेदये महाराजाय। अवजितं गोग्रहणम्। अपयाता धार्तराष्ट्राः।

भगवान्—दिष्ट्या भवान् वर्धते।

राजा—न न। भगवतो वृद्धिरेषा। अथ कुमार इदानीं क।

भटः—दृष्टपरिस्पन्दानां योधपुरुषाणां कर्माणि पुस्तकमारोपयति कुमारः।

राजा—अहो श्लाघनीयव्यापारः खल्वयं कुमारः।

ताडितस्य हि योधस्य श्लाघनीयेन कर्मणा।
अकालान्तरिता पूजा नाशयत्येव वेदनाम् ॥ २८ ॥

अथ बृहन्नलेदानीं क।

भटः—प्रियनिवेदनार्थमभ्यन्तरं प्रविष्टा।

राजा—बृहन्नला तावदाहूयताम्।

भटः—यदाज्ञापयति महाराजः।

(ततः प्रविशति बृहन्नला)

बृहन्नला—(निरूप्य सविमर्शम्)

गाण्डीवेन मुहूर्तमाततगुणेनासीत् प्रतिस्पर्धितं
बाणानां परिवर्तनेष्वविशदा मुष्टिर्न मे संहता।
गोधास्थानगता न चास्ति पटुता स्थाने हृतं सौष्ठवं
स्त्रीभावाच्छिथिलीकृतः परिचयादात्मा तु पश्चात् स्मृतः॥

मया हि,

अनेन वेषेण नरेन्द्रमध्ये
लज्जायमानेन धनुर्विकृष्टम् ।
यात्रा तु तावच्छरदुर्दिनेषु
शीघ्रं निमग्नः कलुषश्च रेणुः ॥ ३० ॥

भोः!

जित्वापि गां विजयमप्युपलभ्य राज्ञो
नैवास्ति मे जयगतो मनसि प्रहर्षः ।
दुःशासनं समरमूर्धनि सन्निगृह्य
बद्ध्वा यदद्य न विराटपुरं प्रविष्टः ॥ ३१ ॥

उत्तराप्रीतिदत्तालङ्कारेणालङ्कृतो व्रीळित इवास्मि राजानं द्रष्टुम् । तस्माद् विराटेश्वरं पश्यामि । अये! अयमार्यो युधिष्ठिरः,

सयौवनः श्रेष्ठतपोवने रतो
नरेश्वरो ब्राह्मणवृत्तमाश्रितः ।
विमुक्तराज्योऽप्यभिवर्धितः श्रिया
त्रिदण्डधारी न च दण्डधारकः ॥ ३२ ॥

(उपगम्य) भगवन्! अभिवादये ।

भगवान्—स्वस्ति ।

बृहन्नला—(क) जेदु भट्टा ।

राजा—

अकारणं रूपमकारणं कुलं
महत्सु नीचेषु च कर्म शोभते ।

(क) जयतु भर्ता ।

इदं हि रूपं परिभूतपूर्वकं
तदेव भूयो बहुमानमागतम् ॥ ३३ ॥

बृहन्नले ! परिश्रान्तामपि भवतीं भूयः परिश्रमयिष्ये उच्यतां रणविस्तरः ।

बृहन्नला — (क) सुणादु भट्टा ।

राजा — अर्जितं कर्म । संक्षुतमभिधीयताम् ।

बृहन्नला — श्रोतुमर्हति महाराजः ।

(प्रविश्य)

भटः — जयतु महाराजः ।

राजा —

अपूर्व इव ते हर्षो ब्रूहि केनापि विस्मितः ।

भटः —

अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः ॥ ३४ ॥

बृहन्नला — कथं गृहीतः । (आत्मगतम्)

तुलितबलमिदं मयाद्य सैन्यं
परिगणितं च रणेऽद्य मे स दृष्टः ।
सदृश इह तु तेन नास्ति काश्चित्
क इह भवेज्जिहतेषु कीचकेषु ॥ ३५ ॥

भगवान् — बृहन्नले ! किमेतत् ।

बृहन्नला — भगवन् !

न जाने तस्य जेतारं बलवाञ्छिक्षितस्तु सः ।
पितॄणां भाग्यदोषेण प्राप्नुयादपि धर्षणम् ॥ ३६ ॥

(क) शृणोतु भर्ता ।

राजा — कथमिदानीं गृहीतः ।

भटः—

रथमासाद्य निःशङ्कं बाहुभ्यामवतारितः ।

राजा —केन ।

भटः —

यः किलैष नरेन्द्रेण विनियुक्तो महानसे ॥ ३७ ॥

बृहन्नला — (अपवार्य) एवमार्यभीमेन परित्यक्तः, न गृहीतः ।

दूरस्था दर्शनादेव वयं सन्तोषमागताः ।
पुत्रस्नेहस्तु निर्विष्टो येन सुव्यक्तकारिणा ॥ ३८ ॥

राजा — तेन सत्कृत्य प्रवेश्यतामभिमन्युः ।

भगवान् — भो राजन् ! वृष्णिपाण्डवनाथस्याभिमन्योः पूजां भयादिति लोको ज्ञास्यति । तदवधीरणमस्य न्याय्यम् ।

राजा — नावधीरणमर्हति यादवीपुत्रः । कुतः,

पुत्रो ह्येष युधिष्ठिरस्य तु वयस्तुल्यं हि नः सूनुना
सम्बन्धो द्रुपदेन नः कुलगतो नप्ता हि तस्माद् भवेत् ।
जामातृत्वमदूरतोऽपि च भवेत् कन्यापितृत्वं हि नः
पूजार्होऽप्यतिथिर्भवेत् स्वविभवैरिष्टा हि नः पाण्डवाः ॥ ३९ ॥

भगवान् — एवमेतत् । वक्तव्यं परिहर्तव्यं च ।

राजा — अथ केनायं प्रवेशयितव्यः ।

भगवान् — बृहन्नलया प्रवेशयितव्यः ।

राजा— बृहन्नले ! प्रवेश्यतामभिमन्युः ।

बृहन्नला — यदाज्ञापयति महाराजः । (आत्मगतम्) चिरस्य खल्वाकाङ्क्षितोऽयं नियोगो लब्धः ।

भगवान् — (आत्मगतम्)

अद्येदानीं यातु सन्दर्शनं वा
शून्ये दृष्ट्वा गाढमालिङ्गनं वा ।
स्वैरं तावद् यातुमुद्भाष्पतां वा
मत्प्रत्यक्षं लज्जते ह्येष पुत्रम् ॥ ४० ॥

राजा — पश्यतु भवान् कुमारस्य कर्म ।

नृपा भीष्मादयो भग्नाः सौभद्रो ग्रहणं गतः ।
उत्तरेणाद्य संक्षेपादर्थतः पृथिवी जिता ॥ ४१ ॥

(ततः प्रविशति भीमसेनः)

भीमसेनः —

आदीपिते जतुगृहे स्वभुजावसक्ता
मद्भ्रातरश्च जननी च मयोपनीताः ।
सौभद्रमेकमवतार्य रथात्तु बालं
तं च श्रमं प्रथममद्य समं हि मन्ये ॥ ४२ ॥

इत इतः कुमारः ।

(ततः प्रविशत्यभिमन्युः)

अभिमन्युः — भोः ! को नु खल्वेषः,

विशालवक्षास्तनिमार्जितोदरः
स्थिरोन्नतांसोरुमहान् कटीकृशः ।
इहाहतो येन भुजैकयन्त्रितो
बलाधिकेनापि न चास्मि पीडितः ॥ ४३ ॥

बृहन्नला — इत इतः कुमारः ।

अभिमन्युः — अये अयमपरः कः,

अयुज्यमानैः प्रमदाविभूषणैः
करेणुशोभाभिरिवार्पितो गजः ।
लघुश्च वेषेण महानिवौजसा
विभात्युमावेषमिवाश्रितो हरः ॥ ४४ ॥

बृहन्नला — (अपवार्य) इमामिहानयता किमिदानीमार्येण कृतम् ।

अवजित इति तावद् दूषितः पूर्वयुद्धे
दयितसुतवियुक्ता शोचनीया सुभद्रा ।
जित इति पुनरेनं *रुष्यते वासुभद्रो
भवतु बहु किमुक्त्वा दूषितो हस्तसारः ॥ ४५ ॥

भीमसेनः — अर्जुन !

बृहन्नला — अथकिमथकिमर्जुनपुत्रोऽयम् ।

भीमसेनः — (अपवार्य)

जानाम्येतान् निग्रहादस्य दोषान्
को वा पुत्रं मर्षयेच्छत्रुहस्ते ।
इष्टापत्त्या किन्तु दुःखे हि मग्ना
पश्यत्वेनं द्रौपदीत्याहृतोऽयम् ॥ ४६ ॥

बृहन्नला — (अपवार्य) आर्य ! अभिभाषणकौतूहलं मे महत् ।
वाचालयत्वेनमार्यः ।

भीमसेनः — बाढम् । अभिमन्यो !

अभिमन्युः — अभिमन्युर्नाम ।

भीमसेनः — रुष्यत्येष मया । त्वमेवैनमभिभाषय ।

बृहन्नला — अभिमन्यो !

---

* रुष्यत इति कर्मवद्भावादात्मनेपद स्यात् । महाकविप्रामाण्यात् स्वरितेत्त्वं वा कल्यम् ।

अभिमन्युः — कथं कथम् । अभिमन्युर्नामाहम् । भोः!

नीचैरप्यभिभाष्यन्ते नामभिः क्षत्रियान्वयाः ।
इहायं समुदाचारो ग्रहणं परिभूयते ॥ ४७ ॥

बृहन्नला — अभिमन्यो! सुखमास्ते ते जननी ।

अभिमन्युः — कथं कथम् । जननी नाम ।

किं भवान् धर्मराजो मे भीमसेनो धनञ्जयः ।
यन्मां पितृवदाक्रम्य *स्त्रीगतां पृच्छसे कथाम् ॥ ४८ ॥

बृहन्नला — अभिमन्यो! अपि कुशली देवकीपुत्रः केशवः ।

अभिमन्युः — कथं तत्रभवन्तमपि नाम्ना । अथकिम् अथकिम् । कुशली भवता संसृष्टः ।

(उभौ परस्परमवलोकयतः)

अभिमन्युः — कथमिदानीं सावज्ञमिव मां हस्यते ।

बृहन्नला — न खलु किञ्चित् ।

पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम् ।
तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः ॥ ४९ ॥

अभिमन्युः —

अलमात्मस्तवं कर्तुं नास्माकमुचितं कुले ।
हतेषु हि शरान् पश्य नाम नान्यद् भविष्यति ॥ ५० ॥

बृहन्नला — (आत्मगतम्) सम्यगाह कुमारः ।

सर(थ)तुरगद्वसना(ग)यौधे
शरनिपुणेन न कश्चिदप्यविद्धः ।
अयमपि च परिक्षतो भवेयं
यदि न मया परिवर्तितो रथः स्यात् ॥ ५१ ॥

---

* 'पृच्छसि स्त्रीगतां कथाम्' इति तु पाठकरण पाणिनीयाना हृद्यम् ।

(प्रकाशम्) एवं वाक्यशौण्डीर्यम् । किमर्थं तेन पदातिना गृहीतः ।

अभिमन्युः—

अशस्त्रो मामभिगतस्ततोऽस्मि ग्रहणं गतः ।
न्यस्तशस्त्रं हि को हन्यादर्जुनं पितरं स्मरन् ॥ ५२ ॥

भीमसेनः—

धन्यः खल्वर्जुनो येन प्रत्यक्षमुभयं श्रुतम् ।
पुत्रस्य च पितुः श्लाघ्यं सङ्ग्रामेषु पराक्रमः ॥ ५३ ॥

राजा— त्वर्यतां त्वर्यतामभिमन्युः ।

बृहन्नला— इत इतः कुमारः । एष महाराजः । उपसर्पतु कुमारः ।

अभिमन्युः— आः कस्य महाराजः ।

बृहन्नला— न न । ब्राह्मणेन सहास्ते ।

अभिमन्युः— ब्राह्मणेनेति । भगवन्! अभिवादये ।

भगवान्— एह्येहि वत्स!

शौण्डीर्यं धृतिविनयं दयां स्वपक्षे
माधुर्यं धनुषि जयं पराक्रमं च ।
एकस्मिन् पितरि गुणानवाप्नुहि त्वं
शेषाणां यदपि च रोचते चतुर्णाम् ॥ ५४ ॥

राजा— एह्येहि पुत्र!। कथं न मामभिवादयसि । अहो उत्सिक्तः खल्वयं क्षत्रियकुमारः । अहमस्य दर्पप्रशमनं करोमि । अथ केनायं गृहीतः ।

भीमसेनः— महाराज! मया ।

अभिमन्युः — अशस्त्रेणेत्यभिधीयताम् ।

भीमसेनः — शान्तं शान्तं पापम् ।

सहजौ मे प्रहरणं भुजौ पीनांसकोमलौ ।
तावाश्रित्य प्रयुध्येयं दुर्बलैर्गृह्यते धनुः ॥ ५५ ॥

अभिमन्युः — मा तावद् सोः !

बाहुरक्षौहिणी यस्य निर्व्याजो यस्य विक्रमः ।
किं भवान् मध्यमस्तातस्तस्यैतत् सदृशं वचः ॥ ५६ ॥

भगवान् — पुत्र ! कोऽयं मध्यमो नाम ।

अभिमन्युः — श्रूयताम् । नन्वनुत्तरा वयं ब्राह्मणेषु, साध्वन्यो ब्रूयात् ।

राजा — भवतु भवतु । सदृच्चनात् पुत्र ! कोऽयं मध्यमो नाम ।

अभिमन्युः — श्रूयताम् । येन,

तु(ल)यित्वा जरासन्धं कण्ठश्लिष्टेन बाहुना ।
असह्यकर्म तत् कृत्वा नीतः कृष्णोऽतदर्हताम् ॥ ५७ ॥

राजा —

न ते क्षेपेण रुष्यामि रुष्यता भवता रमे ।
किमुक्त्वा नापराद्धोऽहं कथं तिष्ठति यात्विति ॥ ५८ ॥

अभिमन्युः — यद्यहमनुग्राह्यः,

पादयोः समुदाचारः क्रियतां निग्रहोचितः ।
बाहुभ्यामाहतं भीमो बाहुभ्यामेव नेष्यति ॥ ५९ ॥

(ततः प्रविशत्युत्तरः)

उत्तरः —

मिथ्याप्रशंसा खलु नाम कष्टा येषां तु मिथ्यावचनेषु भक्तिः ।
अहं हि युद्धाश्रयमुच्यमानो वाचानुवर्ती हृदयेन लज्जे ॥ ६० ॥

(उपसृत्य) भगवन्! अभिवादये ।

भगवान्— स्वस्ति ।

उत्तरः— तात! अभिवादये ।

राजा— एह्येहि पुत्र! आयुष्मान् भव । पुत्र! पूजिताः कृतकर्माणो योधपुरुषाः ।

उत्तरः— पूजिताः । पूज्यतमस्य क्रियतां पूजा ।

राजा— पुत्र! कस्मै ।

उत्तरः— इहात्रभवते धनञ्जयाय ।

राजा— कथं धनञ्जयायेति ।

उत्तरः— अथकिम् । अत्रभवता,

श्मशानाद्धनुरादाय तूणी चाक्षयसायके ।
नृपा भीष्मादयो भग्ना वयं च परिरक्षिताः ॥ ६१ ॥

बृहन्नला— प्रसीदतु प्रसीदतु महाराजः ।

अयं बाल्यात्तु सम्भ्रान्तो न वेत्ति प्रहरन्नपि ।
कृत्स्नं कर्म स्वयं कृत्वा परस्येत्यवगच्छति ॥ ६२ ॥

उत्तरः— व्यपनयतु भवाञ्छङ्काम् । इदमाख्यास्यते,

प्रकोष्ठान्तरसङ्गूढं गाण्डीवज्याहतं किणम् ।
यत्तद् द्वादशवर्षान्ते नैव याति सवर्णताम् ॥ ६३ ॥

बृहन्नला—

एतन्मे पारिहार्याणां व्यावर्तनकृतं किणम् ।
सन्निरोधविव(र्णं वा?र्णत्वा)द् गोधास्थानमिहागतम् ॥ ६४ ॥

राजा— पश्यामस्तावत् ।

बृहन्नला—

रुद्रबाणावलीढाङ्गो यद्यहं भारतोऽर्जुनः ।
अव्यक्तं भीमसेनोऽयमयं राजा युधिष्ठिरः ॥ ६५ ॥

राजा — भो धर्मराज! वृकोदर! धनञ्जय! कथं न मां विश्वसिथ । भवतु भवतु प्राप्तकाले । बृहन्नले! प्रविश त्वमभ्यन्तरम् ।

बृहन्नला — यदाज्ञापयति महाराजः ।

भगवान् — अर्जुन! नखलु नखलु प्रवेष्टव्यम् । तीर्णप्रतिज्ञा वयम् ।

अर्जुनः — यदाज्ञापयत्यार्यः ।

राजा —

शूराणां सत्यसन्धानां प्रतिज्ञां परिरक्षताम् ।
पाण्डवानां निवासेन कुलं मे नष्टकल्मषम् ॥ ६६ ॥

अभिमन्युः — इहात्रभवन्तो मे पितरः । तेन खलु,

न रुष्यन्ति मया क्षिप्ता हसन्तश्च क्षिपन्ति माम् ।
दिष्ट्या गोग्रहणं $स्वन्तं पितरो येन दर्शिताः ॥ ६७ ॥

(भीमसेनमुद्दिश्य) भोस्तात!

अज्ञानात्तु मया पूर्वं यद् भवान् नाभिवादितः ।
तस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि ॥ ६८ ॥

भीमसेनः — एह्येहि पुत्र! पितृसदृशपराक्रमो भव । पुत्र! अभिवादयस्व पितरम् ।

$ स्वन्त शोभनावसानम् ।

अभिमन्युः — भोस्तात! अभिवादये ।

अर्जुनः — एह्येहि पुत्र!

अयं स हृदयह्लादी पुत्रगात्रसमागमः ।
[$]यत्तद् द्वादशवर्षान्ते प्रोषितः पुनरागतः ॥ ६९ ॥

पुत्र! अभिवाद्यतां विराटेश्वरः ।

अभिमन्युः — अभिवादये ।

राजा — एह्येहि वत्स!

यौधिष्ठिरं धैर्यमवाप्नुहि त्वं
भैमं बलं नैपुणमर्जुनस्य ।
माद्रीसुतात् कान्तिमथाभिरूप्यं
कीर्तिं च कृष्णस्य जगत्प्रियस्य ॥ ७० ॥

(आत्मगतम्) उत्तरासन्निकर्षस्तु मां बाधते । किमिदानीं करिष्ये । भवतु दृष्टम् । [§]कोऽत्र ।

(प्रविश्य)

भटः — जयतु महाराजः ।

राजा — आपस्तावत् ।

भटः — यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) इमा आपः ।

राजा — अर्जुन! गोग्रहणविजयशुल्कार्थं प्रतिगृह्यतामुत्तरा ।

भगवान् — एतदवनतं शिरः ।

अर्जुनः — कथं चारित्रं मे तुलयति । भो राजन्!

$ यत्तदिति सामान्ये नपुसकम् । यस्स इत्यर्थः । § (प्रकाशम्) इत्यपेक्षितम् ।

इष्टमन्तःपुरं सर्वं मातृवत् पूजितं मया ।
उत्तरैषा त्वया दत्ता पुत्रार्थे प्रतिगृह्यते ॥ ७१ ॥

भगवान् — एतदुन्नतं शिरः ।

राजा — भवतु पितामहसकाशमुत्तरं प्रेषयामः । धर्मराज! वृकोदर! धनञ्जय! इत इतो भवन्तः ।

(निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः ।

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति भटः)

भटः — भो भोः ! निवेद्यतां निवेद्यतां सर्वक्षत्त्राचार्यपुरोगाणां क्षत्त्रियाणाम् । एष हि,

अपास्य नारायणचक्रजं भयं
चिरप्रनष्टान् परिभूय बान्धवान् ।
धनुःसहायैः कुरुभिर्न रक्षितो
हतोऽभिमन्युः क्रियतां व्यपत्रपा ॥ १ ॥

इति ।

(ततः प्रविशतो भीष्मद्रोणौ)

द्रोणः — सूत ! कथय कथय ।

रण(भुव उ)पनीतः केन मे शिष्यपुत्रः
क इह मम शरैस्तैर्दैवतैर्योऽङ्कुकामः ।
कथय *पुरुषसारं यावदस्त्रं बलं वा
बलवत इव दूतांस्तत्र सम्प्रेषयामि ॥ २ ॥

भीष्मः — सूत ! कथय कथय ।

§भग्नापयानेष्वनभिज्ञदोष-
स्तारुण्यभावेन विलम्बमानः ।
केनैष हस्तिग्रहणोद्यतेन
यूथे प्रयाते कलभो गृहीतः ॥ ३ ॥

---

* पुरुषसार पुरुषश्रेष्ठम् । § भग्नापयानेषु अनभिज्ञ इत्येवंरूपो दोषो यस्य सः, निर्देशे भावप्राधान्याद् अनभिज्ञत्व दोषो यस्य स इति वा । तारुण्यभावेन तारुण्यस्वाभाव्येन, यौवनसाधारणधैर्यावष्टम्भेनेत्यर्थः । विलम्बमानः अपयातुमत्वरमाणः ।

(ततः प्रविशति दुर्योधनः कर्णः शकुनिश्च)

दुर्योधनः—सूत! कथय कथय। केनापनीतोऽभिमन्युः। अहमेवैनं मोक्षयामि। कुतः,

मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेद-
स्तदिह मम च दोषो वक्तृभिः पातनीयः।
अथच मम स पुत्रः पाण्डवानां तु पश्चात्
सति च कुलविरोधे नापराध्यन्ति बालाः॥ ४॥

कर्णः—अतिस्निग्धमनुरूपं चाभिहितम्। गान्धारीमातः!

मा तावत् स्वजनधिया तु बालभावाद्
व्यापन्नः समरमुखे तव प्रियार्थम्।
अस्माभिर्न च परिरक्षितोऽभिमन्यु-
र्गृह्यन्तां धनुरपनीय वल्कलानि॥ ५॥

शकुनिः—बहुनाथः खलु सौभद्रः। मुक्त एवेति सम्प्रधार्यताम्। कुतः,

मुञ्चेदर्जुनपुत्र इत्यवगतो राजा विराटः स्वयं
*स्मृत्वा चाद्य रणाजिरादपगतं मुञ्चेत् स दामोदरम्।
क्रोधोद्भूतहलात् प्रलम्बमथनाद् भीतेन मुच्येत वा
भीमस्त्वेनमिहानयेद् बलमहान् हत्वा रिपूनूर्जितान्॥ ६॥

द्रोणः—सूत! कथय कथय। कथमिदानीं गृहीतः।

पर्यस्तोऽस्य रथो हया नु चपलाश्चक्राक्षमा मेदिनी
तूणी क्षीणशरे त्वमस्य विगुणो ज्याच्छेदवन्ध्यं धनुः।

---

* स्मृत्वेति दामोदरमित्यनेन सम्बध्यते।

एता दैवकृता भवन्ति रथिनां युद्धाश्रया व्यापदो
बाणैरप्यवकृष्यते खलु परैः स्वाधीनशिक्षस्तु सः ॥ ७ ॥

सूतः — आयुष्मन्! परुषमयो धनुर्वेदः। किमायुष्मता न ज्ञायते।

न चापि दोषा भवताभिभाषिताः
स चापि बाणौघमयो महारथः।
अवातचक्रप्रतिमस्तु मे रथो
गृहीत एवापतता पदातिना ॥ ८ ॥

सर्वे — कथं पदातिनेति। अथ कीदृशः स पदातिः।

सूतः — किमभिधास्यामि रूपं वा पराक्रमं वा।

भीष्मः — रूपेण स्त्रियः कथ्यन्ते। पराक्रमेण तु पुरुषाः। तत् पराक्रमोऽस्याभिधीयताम्।

सूतः —आयुष्मन्!

दुर्योधनः —

किमर्थं स्तूयते कोऽपि भवता गर्विताक्षरैः।
कथ्यतां नास्ति मे त्रासो यद्येष पवनो जवे ॥ ९ ॥

सूतः — श्रोतुमर्हति महाराजः। तेन खलु,

लङ्घयित्वा जवेनाश्वान् न्यस्त आपस्करे करः।
प्रसारितहयग्रीवो निष्कम्पश्च रथः स्थितः ॥ १० ॥

भीष्मः — तेन हि न्यस्यन्तामायुधानि।

सर्वे — किमर्थम्।

भीष्मः —

हृतप्रवेगो यदि वा न वा रथो
वृकोदरस्याङ्कगतः स चिन्त्यताम्।

पुरा हि तेन द्रुपदात्मजां हरन्
पदातिनैवावजितो जयद्रथः ॥ ११ ॥

द्रोणः — सम्यगाह गाङ्गेयः । बाल्योपदेशात् प्रभृत्यहं तस्य जवमवगच्छामि । इष्वस्त्रशालायां हि,

कर्णायते तेन शरे विमुक्ते
विकम्पितं तस्य शिरो मयोक्तम् ।
गत्वा तदा तेन च बाणतुल्य-
मप्राप्तलक्षः स शरो गृहीतः ॥ १२ ॥

शकुनिः — अहो हास्यमभिधानम् ।

नास्त्यन्यो बलवाल्लोँके सर्वमिष्टेषु कथ्यते ।
जगद्व्याप्तान् भवन्तः किं सर्वे पश्यन्ति पाण्डवान् ॥ १३ ॥

भीष्मः — गान्धारराज ! सर्वमनुमानात् कथ्यते ।

वयं व्यपाश्रित्य रणं प्रयामः शस्त्राणि चापानि रथाधिरूढाः ।
द्वावेव दोर्भ्यां समरे प्रयातौ हलायुधश्चैव वृकोदरश्च ॥ १४ ॥

शकुनिः —

एकेनैव वयं भग्नाः सहसा साहसप्रियाः ।
उत्तरं च तमप्येके कथयिष्यन्ति फल्गुनम् ॥ १५ ॥

द्रोणः — भो गान्धारराज ! अत्रापि तावद् भवतः सन्देहः ।

किमुत्तरेणापि रणे विकृष्यते
निसृष्टशु(ल्का ? ष्का)शनिगर्जितं धनुः ।
किमुत्तरस्यापि शरैर्हृतातपः
कृतो मुहूर्तास्तमितो दिवाकरः ॥ १६ ॥

भीष्मः — गान्धारीमातः! विस्पष्टं खलु कथ्यते । ननु जानीते भवान् ।

*बाणपुङ्खाक्षरैर्वाक्यैर्यांजिह्वापरिवर्तिभिः ।
विकृष्टं खलु पार्थेन न च श्रोत्रं प्रयच्छति* ॥ १७ ॥

(प्रविश्य)

सूतः — जयत्वायुष्मान् । शान्तिकर्मानुष्ठीयताम् ।

भीष्मः — किमर्थम् ।

सूतः —

उचितं ते पुरा कर्तुं ध्वजे बाणप्रधर्षिते ।
अयं हि बाणः कस्यापि पुङ्खे नामाभिधीयते ॥ १८ ॥

भीष्मः — आनय ।

(सूत उपनयति)

भीष्मः — (गृहीत्वा निरीक्ष्य) वत्स! गान्धारराज! जराशिथिलं मे चक्षुः । वाच्यतामयं शरः ।

शकुनिः — (गृहीत्वानुवाच्य) अर्जुनस्य । (इति क्षिपति । द्रोणस्य पादयोः पतति)

द्रोणः — (शरं गृहीत्वा) एह्येहि वत्स!

एष शिष्येण मे क्षिप्तो गाङ्गेयं वन्दितुं शरः ।
पादयोः पतितो भूमौ मां क्रमेणाभिवन्दितुम् ॥ १९ ॥

शकुनिः —

यौधः स्यादर्जुनो नाम तेनायं चोज्झितः शरः ।
लिखितं चोत्तरेणापि प्रकाशमुपनीयताम् ॥ २० ॥

---

* बाणपुङ्खस्थैरक्षरैः अर्जुननामघटकैः । वाक्यैः. लक्षणया ध्वनिभिरित्यर्थः । * भवानिताहापि सम्बध्यते ।

दुर्योधनः—

तेषां राज्यप्रदानार्थमनृतं कथ्यते यदि ।
राज्यस्यार्धं प्रदास्यामि यावद् दृष्टे युधिष्ठिरे ॥ २१ ॥

(प्रविश्य)

भटः—जयतु महाराजः । विराटनगराद् दूतः प्राप्तः ।

दुर्योधनः—प्रवेश्यताम् ।

भटः—यदाज्ञापयति महाराजः । (निष्क्रान्तः)

(ततः प्रविशत्युत्तरः)

उत्तरः—

अध्वानमल्पमतिमुक्तजवैस्तुरङ्गै-
रागच्छता पथि रथेन विलम्बितं मे ।
कौन्तेयबाणनिहतैर्द्विरदैः समन्ताद्
दुःखेन यान्ति तुरगा विषमा हि भूमिः ॥ २२ ॥

(प्रविश्य कृताञ्जलिः) भो भो आचार्य ! पितामहपुरोगं सर्व-
राजमण्डलमभिवादये ।

सर्वे—आयुष्मान् भव ।

द्रोणः—किमाह तत्रभवान् विराटेश्वरः ।

उत्तरः—नाहं तत्रभवता प्रेषितः ।

द्रोणः—अथ केन त्वं प्रेषितः ।

उत्तरः—तत्रभवता युधिष्ठिरेण ।

द्रोणः—किमाह धर्मराजः ।

उत्तरः — श्रूयताम्,

उत्तरा मे स्नुषा लब्धा प्रतीक्षे राजमण्डलम् ।
तत्रैव किमिहैवास्तु विवाहः क्व प्रवर्तताम् ॥ २३ ॥

शकुनिः — तत्रैव तत्रैव ।

द्रोणः —

इत्यर्थं वयमानीताः *पञ्चरात्रोऽपि वर्तते ।
धर्मेणावर्जिता भिक्षा धर्मेणैव प्रदीयताम् ॥ २४ ॥

दुर्योधनः —

बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम् ।
मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति ॥ २५ ॥

द्रोणः —

हन्त सर्वे प्रसन्नाः स्मः प्रवृद्धकुलसङ्ग्रहाः ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥ २६ ॥

(निष्क्रान्ताः सर्वे)

तृतीयोऽङ्कः

अवसित पञ्चरात्रम् ।

शुभ भूयात् ।

---

* पञ्चानां रात्रीणां समाहारः पञ्चरात्र, 'सङ्ख्यापूर्वं रात्र क्लीबम्' इति क्लीबत्वम् । तदस्या 'स्तीत्यचि पञ्चरात्र. । अद्यापि प्रतिश्रुतरात्रिपञ्चकानल्पयात् तद्युक्तः काल इत्यर्थः ।

श्लोकानुक्रमणिका ।

	पृष्ठम्		पृष्ठम्
अकारण रूप	३३	उत्तरा मे सुषा	५१
अगणितगुण	२८	उद्योग· प्रस्तुतः	२६
अग्निरग्निभया	३	उपन्यस्तस्य शि	११
अज्ञानात्तु मया	४२	एकवर्णेषु गा	२५
अतीत्य बन्धून	६	एकेनैव वय भ	४८
अद्य मे कार्यलो	१६	एकोदकत्वं खलु	२६
अद्येदानीं पर्ण	२७	एतदक्षयतूणी	३१
अद्येदानीं यातु	३६	एतदमेर्बल	४
अध्वानमल्पमति	५०	एतन्मे परिहा	४९
अनेन वेषेण	३३	एतां चक्रधर	३
अपास्य नाराय	४५	एभिरेव ग्रथै	१८
अपूर्व इव ते	३४	एवमेव कतून्	८
अय बाल्यात्तु स	४१	एष शिष्यस्य	१४
अय स हृदय	४३	एष शिष्येण मे	४१
अयुज्यमानैः प्र	३७	एषा दीप्तैकयू	३
अलमात्मस्तव	३८	कथं पण्डित! कू	१७
अवजित इति	३७	कर्णायते तेन	४८
अवनतविट	५	कामं दुर्योधन	२५
अवाप्य रूप्यग्र	६	किं भवान् धर्म	३८
अशक्तो मामभि	३९	किन्नु तत्परिहा	२९
अहं हि मात्रा	७	किमर्थं खलु स	२७
आचार्यस्य यदा	१८	किमर्थं स्तूयते	४७
आदीपिते जतु	३६	किमुत्तरेणापि	४८
आलम्बितो भ्रम	३१	कृतश्रद्धो ह्यात्मा	६
इक्ष्वाकुशय्याति	७	कृता नीला नागाः	३०
इत्यर्थं वयमामी	५१	को नु खल्वेष स	,,
इष्टमन्तःपुर	४४	क्रतुव्रतैस्ते न	८
उचित ते पुरा	४९	क्रोधप्राय वयो	१४

	पृष्ठम्		पृष्ठम्
गजेन्द्राः कल्प्यन्ते	२६	पर्यस्तोऽस्य र	४६
गतो वृक्षाद् वृ	४	पादयोः समुदा	४०
गाण्डीवेन मुहू	३२	पार्थ पितरमु	३८
गुरुकरतल	१५	पीत' सोमो बाल्य	९
जानाम्येतान्	३७	पुत्रो ह्येष युधि	३५
जित्वापि गां वि	३३	प्रकोष्ठान्तरस	४१
[illegible]	१८	प्राणाधिकोऽस्मि	१०
	३२	बहुभि समराभि	२९
	४०	बाढ दत्त मया	५१
	२४	बाणपुङ्खाक्षरै	४९
	२	बाणार्धाना क्षत्रि	६
	५०	बाहुरक्षौहिणी	४०
	१३	भग्नापयानेष्व	४५
	२९	भीमसेनस्य ली	१७
	४	भीष्मेण कर्णेन	१३
	३५	भीष्म रामशरै	३१
	७	भ्रातॄणां पैतृक	११
	२३	मम हि पितृभिर	४६
	१	मा तावद् व्यथि	२४
	२७	मा तावत् स्वजन	४६
	२	मिथ्याप्रशसा	८०
	२५	मुञ्चेदर्जुनपुत्र	४९
	३१	यज्ञेन भोजय	५
	३९	यत् पाण्डवा द्रुप	११
	१८	यत् पुरा ते सभा	१२
	४७	यदि विमृशसि	१०
	३४	यदि स्वचक्रोद्ध	२९
न ते क्षेपेण रु	४०	युध्यते यदि सौ	३१
न रूष्यन्ति मया	४२	ये दुर्बलाश्च कृ	१२
नास्त्यन्यो बल	४८	येन भीमः सभा	,,
निमित्त किञ्चि	३०	येषां गतिः क्वापि	११
नीचैरप्याभिभा	३८	(यैः ? ये) कर्तुकामै	१५
नृपा भीष्मादयो	३६	यौधिष्ठिरं धैर्य	४३

	पृष्ठम्		पृष्ठम्
यौध· स्यादर्जु	४९	शुष्केणैकेन वृ	८
रण(भुव उ)पनी	४५	शून्यमित्यभिधा	५५
रथमानय शी	२८	शूराणा मत्यस	८२
रथमासाद्य नि·	३५	शौण्डीर्य धृतिवि	३९
राज्ञां वेष्टनप	२	श्मशानाद्धनुरा	४१
रात्रौ छन्नेन	१७	सज्जैश्चापैर्बद्ध	२४
रामेण भुक्ता	१८	सर्यावन श्रेष्ठ	३३
रिपूणां सैन्यमे	२८	सर(ध)तुरग	३८
रुद्रबाणावली	८२	सर्वैरन्त पुरैः	२
वन सवृक्षक्षु	४	सहजौ मे प्रहरण	८०
वय व्यपाश्रित्य	८८	स्रुग्भाण्डमरणा	४
वर्षेण वा वर्ष	१६	हन्त सर्वे प्रस	५१
वल्मीकमूलाद्	३	हितमपि पर	१३
विशालवक्षास्त	३६	हतप्रवेगो यदि	४७
शकटी च घृता	३		